# केरलपाठावलिः

# संस्कृतम्

## सप्तमी कक्ष्या

अक्कादमिक - संस्कृतविद्यालयानां कृते

## KERALA READER - SANSKRIT

Standard VII

FOR ACADEMIC & SANSKRIT SCHOOLS

**Government of Kerala**
**Department of Education**
**2016**

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारतभाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधितरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगणमंगलदायक जय हे,
भारतभाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

*Prepared by:* State Council of Educational Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12, Kerala.
E-mail:scertkerala@gmail.com

First Edition : 2014, Reprint : 2016

*Type setting by:* SCERT Computer Lab.
*Printed at:* KBPS, Kakkanad, Kochi-30

© Government of Kerala
Education Department
2016

# भूमिका।

आधुनिकविद्याभ्यासप्रक्रियासु नूतनाशयानां सन्निवेशः प्रकटो दृश्यते। शिशोः समग्रं विकासं (शारीरिकं, मानसिकं, बौद्धिकं) लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः प्रचलति। अत एव पाठ्यपुस्तकरचनायां विद्याशास्त्रिणः केरलराज्यशासकाश्च अवहिताः भवन्ति।

अधीतिः, बोधः, आचरणं, प्रचारणं चेति चतुर्धा विभक्ता विद्याभ्यासप्रक्रिया। एतत्फलप्राप्तये कालानुकूलं परिष्करणमपि आवश्यकम् अस्ति। शिशुमनःशास्त्रम् अनुसृत्यैव पाठ्यपुस्तकरचना कृता। तदर्थम् उपयोगिनी भवति परिष्कृता पाठ्यपद्धतिः। भारत देशीयपाठ्यपद्धतीः मूल्यनिर्णयोपाधींश्च उपजीव्यैव निर्मितमिदं पाठ्यपुस्तकम्।

प्रथमं पाठभागः, तदनु पठनप्रवर्तनानि, ततः अनुबन्धश्चेति क्रम एव सर्वेषु पाठेषु स्वीकृतः। कथापूरणं, गानालपनम्, अभिनयः इत्यादीनि शिशुकेन्द्रीकृतानि मानसिकविकासोल्लासप्रदानि पठनप्रवर्तनानि अत्र समायोजितानि विद्यन्ते। संस्कृतभाषां प्रति छात्रेषु आभिमुख्यं जनयितुं कथाः, गीतानि, सुभाषितादीनि च अत्र आयोजितानि सन्ति। सरलया रीत्या भाषाप्रयोगसामर्थ्यं सम्पादयितुम् अनेन छात्राः शक्ताः भवेयुः।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदः नेतृत्वे, अध्यापकानाम्, विद्याभ्यासविचक्षणानां च कठिनपरिश्रमस्य फलमेवेदं पाठ्यपुस्तकम्।

पठनोपकरणेष्वन्यतमम् एतत् पुस्तकं विद्यार्थिनां स्वयंपठनाय सहायकं भवति। नूतनमिदं पाठ्यपुस्तकं विद्याकुतुकिनां हस्तेषु समर्पयन्नहं नितरां निर्वृतिमनुभवामि।

पाठ्यपुस्तकमिदं लक्ष्यसाधकं कर्तुं भवदीयानामपि निर्देशान् सादरं प्रार्थये।

भवदीयः

**डा॰ पी.ए फत्तिमा**

अनन्तपुरी

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः।

# TEXTBOOK DEVELOPMENT COMMITTEE
## SANSKRIT

**Participants**

- **P.Ramesh Nambeesan**
  UPSA, Govt.U.P. School, Moorkanad, Areacode, Malappuram.
- **Raju.K**
  Govt.Senior Basic School, Soorambail, Kumbla, Kasargod.
- **Rajeevan**
  H S A, Govt.H S S, Parappa, Kasargod.
- **Anitha**
  H S A, Govt.H S S, Cotton Hill, Thiruvananthapuram.
- **Sunil Kumar**
  S D V H S S, Peramangalam, Thrissur.
- **K.G.Remabai**
  H S A (Rtd.), Priyalaya, Kannapuram, Cherukunnu, Kannur.
- **Biju.P**
  U P S A, Chemmanchery U P S, Koyilandy.
- **Anoop.T.P**
  U P S A, PTPM UPS Thymaravumkara, Thiruvalla, Pathanamthitta.
- **Reshmi G.Pillai**
  K V S H S S Muthukulam, Alappuzha.

**Experts**

- **Dr.Poornima**
  Associate Professor, S S U S, Kalady.
- **Dr.S.S.Vivekanandan**
  Asst.Professor, Govt.Sanskrit College, Thiruvananthapuram.
- **Dr.T.D.Suneethi Devi**
  (Special Officer(Sanskrit), D P I Office, Jagathy, Thiruvananthapuram.

**Advisor**

- **Prof.R.Vasudevan Potti,** Prof. (Rtd.)
  Sivadhamam, Sreekandeswaram, Thiruvananthapuram.

**Artists**

- **Balakrishnan Achari,** P.G, Lecturer (Rtd.), DIET.
- **Aravindan.B,** Puthuparambil, Gandhinagar, Kottayam.

**Academic Co - Ordinator**

- **Dr. Kerala Sreemathi. T,** Research Officer (Sanskrit), SCERT.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् - केरलाः


STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING - KERALA

# विषयानुक्रमणिका


| क्रमसंख्या | पाठस्य नाम | व्यवहाररूपाणि | पुटसंख्या |
|---|---|---|---|
| 1. | मित्रक! आयातु | बालगीतम् | 6-10 |
| 2. | न मूर्खमुपदिशेत् | कथा | 11-17 |
| 3. | हनूमत्प्रभावः | काव्यम् | 18-26 |
| 4. | आदर्शभूतः संस्कृतग्रामः | विवरणम् | 27-32 |
| 5. | शरीरमाद्यं खलु धर्मसाधनम् | सुभाषितम् | 33-38 |
| 6. | पुत्रोऽहं पृथिव्याः | रूपकम् | 39-47 |
| 7. | श्रमप्रधानो लोकः | कथा | 48-53 |
| 8. | चाक्यार्कूत्त् | प्रबन्धः | 54-57 |
| 9. | स्वामी विवेकानन्दः | जीवनचरितम् | 58-63 |
| 10. | गोकुलविहारः | काव्यम् | 64-74 |
| 11. | सहसा विदधीत न क्रियाम् | कथा | 75-80 |

# १

# मित्रक! आयातु।



*तालानुसारं कवितालपनं बालाः सर्वे इच्छन्ति। तदर्थं मनोरञ्जिका काचित् कविता अधो दीयते।*

प्रातःकाले मामकभवनं
कोकिल! आयातु।
कोकिल! आयातु।
भवान् समायातु।
प्रतिदिनमस्मिन् कदलीपत्रे
मित्रक! उपविशतु।
मित्रक ! उपविशतु।
प्रातःकाले मामकभवनं- - - -
अरुणारुणनवरूपं पश्यन्
विस्मयमनुभवतु।
विस्मयमनुभवतु।
नवनवसूनैर्विलसितभूमे-
र्लावण्यं स्वदताम्। लावण्यं स्वदताम्।
प्रातःकाले मामकभवनं.....



आनन्दामृतपूरितमनसा
कौतुकमुपयातु।
कौतुकमुपयातु।
तालसमेतं कलकलनिनदं
गीतकमालपतु।
कोकिल! गीतकमालपतु।

प्रातः काले मामकभवनं
कोकिल! आयातु।
कोकिल! आयातु।
भवान् समायातु।।

## पदच्छेदः

नवनवसूनैर्विलसितभूमेर्लावण्यम्- नवनवसूनैः + विलसितभूमेः + लावण्यम्।

## विग्रहः

| | | |
|---|---|---|
| प्रतिदिनम् | - | दिने दिने। |
| कदलीपत्रे | - | कदल्याः पत्रं कदलीपत्रं, तस्मिन्। |
| अरुणारुणनवरूपम् | - | अरुणस्य अरुणम् अरुणारुणं, नवं च तद् रूपं च नवरूपम्, अरुणारुणञ्च तत् नवरूपं च अरुणारुणनवरूपम्। |

## पठनप्रवर्तनानि

- कवितां सतालमालपतु।

श्रद्धेयाः अंशाः

उचितः तालः।

अक्षरस्फुटता।

आशयावबोधः।

- प्रातःकाले मामकभवनं कोकिल आयातु। कोकिलस्य स्थाने अन्येषां प्राणिनां नामानि उपयुज्य कवितायाः परिवर्तनं करोतु।

श्रद्धेयौ अंशौ

उचितपदप्रयोगः।

आशयपूर्णता।

- बालकविताः समाहरतु। अवतारयतु।

श्रद्धेयौः अंशौः

समाहरणपटुता।

समीचीनया रीत्या अवतारणम्।

- अधोनिर्दिष्टेषु इष्टतमं विषयमधिकृत्य बालकवितां रचयतु।

सूर्योदयः, उद्यानम्, वनम्।

श्रद्धेया अंशाः

आशयपूर्णता।

विषयावबोधः।

- आलपतु, आयातु एतादृशानि पदानि कवितायाः चित्वा लिखतु।

श्रद्धेयौ अंशौ

उचितपदसमाहरणम्।

अवतारणम्।

## अनुबन्धः।

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| कोकिलः | पिकः | കുയിൽ | ಕೋಗಿಲೆ | *cuckoo* |
| आयातु | आगच्छतु | വരൂ | ಬಾ | *come* |
| भवनम् | गृहम्/गेहम् | വീട് | ಮನೆ | *house* |
| मामकभवनम् | मदीयं गेहम् | എന്റെ വീട്ടിലേയ്ക്ക് | ನನ್ನ ಮನೆಯನ್ನು | *to my home* |
| समायातु | समागच्छतु | വരൂ | ಬಾ | *come* |
| प्रतिदिनम् | दिने दिने | ദിവസം തോറും | ಪ್ರತಿದಿನವೂ | *daily* |
| कदलीपत्रे | रम्भापत्रे | വാഴ ഇലയിൽ | ಬಾಳೆ ಎಲೆಯಲ್ಲಿ | *on banana leaf* |
| अरुणः | सूर्यसारथिः/ अरुणवर्णः | സൂര്യസാരഥി/ കുങ്കുമനിറം | ಸೂರ್ಯ/ ಅರುಣಬಣ್ಣ | *Charioter of sun/ saffron colour* |
| नवरूपम् | नूतनरूपम् | പുതിയരൂപം | ಹೊಸರೂಪ | *new form* |
| विस्मयम् | अद्भुतम् | അതിശയത്തെ | ಆಶ್ಚರ್ಯ | *wonder* |
| सूनम् | पुष्पम् | പൂവ് | ಹೂವು | *flower* |
| लावण्यम् | सौन्दर्यम् | സൗന്ദര്യം | ಸುಂದರ | *beauty* |
| निनदः | शब्दः | ശബ്ദം | ಶಬ್ದ | *sound* |

**अमरकोशः**

कोकिलः - वनप्रियः परभृतः कोकिलः पिक इत्यपि।

कदली - कदली वारणबुसारम्भा मोचांशुमत्फला काष्ठीला।

सूनम् - स्त्रियां सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।

निनदः - शब्दे निनादनिनदध्वनिध्वानरवस्वनाः।

अरुणः - अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु।(नानार्थः)



**धातुरूपाणि**

**आ + या प्रापणे परस्मैपदी लोट्।**

| | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आयातु/आयातात् | आयाताम् | आयान्तु |
| मध्यमपुरुषः | आयाहि/आयातात् | आयातम् | आयात |
| उत्तमपुरुषः | आयानि | आयाव | आयाम। |

उपविशतु - उप + विश् प्रवेशने - परस्मैपदी लोट् प्रथमपुरुषः एकवचनम्।

अनुभवतु - अनु + भू सत्तायां - परस्मैपदी लोट् प्रथमपुरुषः एकवचनम्।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | तालसमन्वितं गीतमालपितम्। | | | | |
| २. | निर्देशानुसारं बालकविता परिवर्तिता। | | | | |
| ३. | बालकविताः समाहृताः। | | | | |
| ४. | कविता रचिता। | | | | |
| ५. | लोट्पदानि चितानि। | | | | |

*


*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*


२

# न मूर्खमुपदिशेत्।

*पण्डितेन विष्णुशर्मणा रचितं नीतिसाराणां कथानां समाहारभूतं भवति पञ्चतन्त्रम्। तत्र पञ्चतन्त्राणि- मित्रलाभः, मित्रभेदः, काकोलूकीयं, लब्धप्रणाशः, अपरीक्षितकारकं च भवन्ति। अमरशक्तिः महिलारोप्यनामकस्य राष्ट्रस्य राजा आसीत्। तस्य पुत्राः मूर्खाः आसन्। विष्णुशर्मा तान् पशुपक्ष्यादीनां कथानां साहायेन बुद्धिमतः अकारयत्। तत्र मित्रभेदनामकात् तन्त्रात् सङ्कलितेयं कथा।*

कस्मिंश्चिदरण्ये वानरयूथं वसति स्म। तत्रैव सूचीमुखः नाम खगः अपि आसीत्। हेमन्तकालः समागतः। झञ्झावातः वाति। घनाः गर्जन्ति। विद्युतः स्फुरन्ति। वृक्षाः धुवन्ति। महती वृष्टिर्भवति। सर्वा प्रकृतिः शब्दमुखरिता च। किन्तु पशुपक्षिणः स्वावासस्थाने स्थिताः मौनम् अनुतिष्ठन्ति। तीव्रेण शैत्येन सर्वे वानराः कम्पन्ते। केचिद्वानराः भूमौ पतितानि गुञ्जाफलानि अङ्गारान् मत्वा सञ्चित्य प्रज्वलनाय धमन्ति स्म। वानराणां व्यर्थं प्रयत्नं विलोक्य सूचीमुखः अवदत् - “भोः! मूर्खाः! नैते वह्निकणाः, गुञ्जाफलान्येतानि। एतस्माच्छीतरक्षा न भविष्यति। निर्वातं वनप्रदेशं गुहां वा गच्छन्तु” इति। वानरास्तु इमाः वाचः विगणय्य पुनः तदेव अकुर्वन्। सूचीमुखः पुनः पुनः अवदत् - ‘भोः! किं वृथा क्लेशेन’ इति।






तदा कश्चिद्वृद्धवानरः सूचीमुखमवदत् - "भोः! किं तवानेनोपदेशेन? व्याधं, मूर्खं, व्यसनसंस्थितं च यः उपदिशति, सः पराजयं प्राप्नोति। अतः मौनं भज" इति।

सूचीमुखः तु वृद्धवानरमनादृत्य तदेव अनवरतं वदति स्म। अन्ते कुपितः कश्चिद्वानरः सूचीमुखं गृहीत्वा अमारयत्। अत एवोच्यते -

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
पयःपानं भुजङ्गानां केवलं विषवर्धनम्।। इति।

### पदच्छेदः

| | | |
|---|---|---|
| गुञ्जाफलान्येतानि | - | गुञ्जाफलानि + एतानि। |
| एतस्माच्छीतरक्षा | - | एतस्मात् + शीतरक्षा। |
| तेष्वेकः | - | तेषु + एकः। |
| वृद्धवानरोऽवदत् | - | वृद्धवानरः + अवदत्। |
| मौनं भज | - | मौनम् + भज। |
| नैते | - | न + एते। |
| अत एवोच्यते | - | अतः + एव + उच्यते। |
| तवानेनोपदेशेन | - | तव + अनेन + उपदेशेन। |
| सङ्कलितेयम् | - | सङ्कलिता + इयम् |
| वृष्टिर्भवति | - | वृष्टिः + भवति |
| कश्चिद्वानरः | - | कश्चित् + वानरः |
| वानरास्तु | - | वानराः + तु |



## विग्रहः।

| | | |
|---|---|---|
| पशुपक्षिणः | - | पशवः च पक्षिणः च। |
| वृद्धवानरः | - | वृद्धः च असौ वानरः च। |
| व्यसनसंस्थितम् | - | व्यसने संस्थितः व्यसनसंस्थितः, तम्। |
| निर्वातम् | - | निर्गतः वातः यस्मात् सः निर्वातः, तम्। |
| वानरयूथम् | - | वानराणां यूथम्। |
| मौनम् | - | मुनेः भावः। |

## पठनप्रवर्तनानि।

- अस्यां कथायां मूर्खः कः इति चर्चां कृत्वा टिप्पणीं लिखतु।

  श्रद्धेयाः अंशाः -

  भागभागित्वम्।

  विवेचनसामर्थ्यम्।

  उचितभाषाप्रयोगः।

- सूचीमुखस्य अनुभवं वार्तारूपेण लिखतु।

  श्रद्धेयाः अंशाः

  वाक्यघटना।

  उचितं शीर्षकम्।

- अधोदत्तानि अव्ययपदानि उपयुज्य वाक्यानि रचयतु।

  मौनम्, वारं वारम्, विलोक्य, अनवरतम्।

  श्रद्धेयौ अंशौ

  अर्थावगमः।

  उचितं वाक्यम्।

- कथास्तम्भान् क्रमीकरोतु।

  - सूचीमुखः परिहसति।
  - क्रुद्धः एकः मर्कटः पक्षिणं मारयति।

- गुञ्जाफलानि स्वीकृत्य फूत्कुर्वन्ति।
- वृद्धवानरस्य वाक्यं तिरस्कृत्य पुनः पुनः परिहसति।
- एकस्मिन् वने वानरसमूहः अवसत्।
- मूर्खेभ्यः उपदेशः नाशाय भवति।
- शैत्यम् असहमानाः वानराः कम्पन्ते।
- वृद्धवानरः उपदिशति।

श्रद्धेयौ अंशौ

आशयावबोधः।

विवेचनसामर्थ्यम्।

■ कथां कक्ष्यायाम् अवतारयतु।

श्रद्धेयाः अंशाः

आशयावबोधः।

उचितः भावः।

उच्चारणस्फुटता।

■ उदाहरणानुसारं धातूनां लकाररूपाणि लिखतु।

| | धातुः | लट् | लङ् |
|---|---|---|---|
| उदा- | वस् | वसति | अवसत् |
| | पठ् | —— | —— |
| | वद् | —— —— | |
| | लिख् | —— —— | |
| | भू | —— —— | |

## अनुबन्धः।

### विशेषप्रयोगः।

वसति स्म - वर्तमानकालक्रियया रूपेण सह 'स्म' योगे भूतकालार्थः सिद्ध्यति।

**अमरकोशः।**

| | | |
|---|---|---|
| वानरः | - | कपिः प्लवङ्गप्लवगशाखामृगवलीमुखाः। मर्कटो वानरः कीशो वनौकाः। |
| खगः | - | खगो विहंगविहगविहंगमविहायसः। |
| वातः | - | नभस्वद्वातपवनपवमानप्रभञ्जनाः। |
| वनम् | - | अटव्यरण्यं विपिनं गहनं काननं वनम्। |
| वाक् | - | ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती। |
| व्याधः | - | व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः। |
| भुजङ्गः | - | सर्पः पृदाकुर्भुजङ्गो भुजगोऽहिर्भुजङ्गमः। |

**शब्दकोशः**

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| यूथम् | समूहः | കൂട്ടം | ಗುಂಪು | *group* |
| वातः | वायुः | വായു | ಗಾಳಿ | *air* |
| वाति | वीजति | വീശുന്നു | ಬೀಸುತ್ತದೆ | *blows* |
| धुवन्ति | कम्पन्ते | ആടുന്നു | ಅಲುಗಾಡುತ್ತವೆ | *shakes* |
| गुञ्जाफलम् | काकचिञ्ची | കുന്നിക്കുരു | ಗುಲಗುಂಜಿ | *abrus seed* |
| धमन्ति | फूत्कुर्वन्ति | ഊതുന്നു | ಊದುತ್ತವೆ(ತಣಿಸಲು) | *blows* |
| विलोक्य | दृष्ट्वा | നോക്കിയിട്ട് | ನೋಡಿ | *on seeing* |
| निर्वातः | वायुरहितः | കാറ്റില്ലാത്ത | ಗಾಳಿಯಿಲ್ಲದ | *windless* |
| विगणय्य | तिरस्कृत्य | അവഗണിച്ചിട്ട് | ಕಡೆಗಣಿಸಿ | *having ignored* |
| व्याधः | लुब्धकः | വേടൻ | ಬೇಟೆಗಾರ | *hunter* |
| पयःपानम् | क्षीरपानम् | പാലുകുടിക്കൽ | ಹಾಲುಕುಡಿಯುವಿಕೆ | *drinking milk* |
| मौनम् | निश्शब्दता | മൗനം | ನಿಶ್ಶಬ್ದ | *silence* |
| झञ्झावातः | घोरवातः | കൊടുങ്കാറ്റ് | ಬಿರುಗಾಳಿ | *storm* |



## नामरूपाणि।

### नकारान्तः नपुंसकलिङ्गः कर्मन् शब्दः

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कर्म | कर्मणी | कर्माणि |
| सं.प्रथमा | हे कर्मन् | हे कर्मणी | हे कर्माणि |
| द्वितीया | कर्म | कर्मणी | कर्माणि |
| तृतीया | कर्मणा | कर्मभ्यां | कर्मभिः |
| चतुर्थी | कर्मणे | कर्मभ्यां | कर्मभ्यः |
| पञ्चमी | कर्मणः | कर्मभ्यां | कर्मभ्यः |
| षष्ठी | कर्मणः | कर्मणोः | कर्मणाम् |
| सप्तमी | कर्मणि | कर्मणोः | कर्मसु। |


### चकारान्तः स्त्रीलिङ्गः वाच् शब्दः

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वाक् | वाचौ | वाचः |
| सं.प्रथमा | हे वाक् | हे वाचौ | हे वाचः |
| द्वितीया | वाचं | वाचौ | वाचः |
| तृतीया | वाचा | वाग्भ्यां | वाग्भिः |
| चतुर्थी | वाचे | वाग्भ्यां | वाग्भ्यः |
| पञ्चमी | वाचः | वाग्भ्यां | वाग्भ्यः |
| षष्ठी | वाचः | वाचोः | वाचाम् |
| सप्तमी | वाचि | वाचोः | वाक्षु। |

## धातुरूपाणि।

### वृतु वर्तने आत्मनेपदी लङ्।

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र. पु | अवर्तत | अवर्तेताम् | अवर्तन्त |
| म. पु | अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् |
| उ. पु | अवर्ते | अवर्तावहि | अवर्तामहि। |



**प्र + आप्लृ व्याप्तौ परस्मैपदी लट् ।**

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र. पु | प्राप्नोति | प्राप्नुतः | प्राप्नुवन्ति |
| म. पु | प्राप्नोषि | प्राप्नुथः | प्राप्नुथ |
| उ. पु | प्राप्नोमि | प्राप्नुवः | प्राप्नुमः । |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | चर्चां कृत्वा टिप्पणी लिखिता । | | | | |
| २. | वार्तारूपेण अनुभवः लिखितः । | | | | |
| ३. | अव्ययपदानि उपयुज्य वाक्यानि रचितानि । | | | | |
| ४. | कथास्तंभाः क्रमीकृताः । | | | | |
| ५ | कथा कथिता । | | | | |
| ६. | तिङन्तरूपाणि लिखितानि । | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



३

# हनूमत्प्रभावः।

*सीतान्वेषणाय वानराः चतसृषु दिक्षु अगच्छन्। अङ्गदस्य नेतृत्वे हनूमदादयः वानराः दक्षिणसमुद्रतीरं प्राप्ताः। तत्र लङ्कागमनाय समुद्रलङ्घनविषये विचारविमर्शः जातः। वानराः स्वस्वशक्तिपरिमितिं प्राकटयन्। हनूमान् तु तूष्णीमतिष्ठत्। तदा ऋक्षराजः जाम्बवान् समीपं गत्वा तं प्रचोदयति स्म। हनूमतः आत्मविश्वासवर्धनात्मकं रामायणसन्दर्भं पठामः।*

जाम्बवान् एवं वदति -


१. **वीर! वानरलोकस्य सर्वशास्त्रविदां वर!**

**तूष्णीमेकान्तमाश्रित्य हनूमन्! किं न जल्पसि?**

**पदच्छेदः**

| | | |
|---|---|---|
| सर्वशास्त्रविदां वर | - | सर्वशास्त्रविदाम् + वर। |
| किं न | - | किम् + न। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (हे) वानरलोकस्य वीर! | - | वानरसमुदायस्य शूर! |
| सर्वशास्त्रविदां वर! | - | सर्वशास्त्रपण्डितमध्ये श्रेष्ठ! |
| हनूमन्! | - | हे वायुपुत्र! |
| तूष्णीम् | - | मौनम् |
| एकान्तम् आश्रित्य | - | रहोदेशं प्राप्य |
| किं | - | केन कारणेन |
| न जल्पसि? | - | न वदसि? |



**सारांशः**

हे हनूमन्! त्वं वानरलोकस्य शूरः शास्त्रपण्डितेषु श्रेष्ठः च असि। तादृशः भवान् किमर्थम् एकाकी सन् उपविशति? केन कारणेन त्वं किमपि न वदसि?

**विग्रहः।**

वानरलोकस्य - वानराणां लोकः वानरलोकः, तस्य।

शास्त्रविदाम् - शास्त्रं विदन्ति इति शास्त्रविदः, तेषाम्।

२. **हनूमन्! हरिराजस्य सुग्रीवस्य समो ह्यसि।**

**रामलक्ष्मणयोश्चापि तेजसा च बलेन च।।**

**पदच्छेदः**

समो ह्यसि - समः + हि + असि।

रामलक्ष्मणयोश्चापि - रामलक्ष्मणयोः + च + अपि।

| **अन्वयः** | | **अर्थः** |
| --- | --- | --- |
| हनूमन्! | - | (हे) आञ्जनेय! |
| हि | - | यस्मात् कारणात् |
| हरिराजस्य | - | वानरराजस्य |
| सुग्रीवस्य | - | किष्किन्धाधिपस्य |
| समः | - | समानः |
| असि | - | भवसि |
| तेजसा | - | प्रभावेण |
| बलेन च | - | शक्त्या च |
| रामलक्ष्मणयोः च अपि | - | रामस्य लक्ष्मणस्य च अपि |
| (समःअसि) | - | समानः भवसि। |

**सारांशः**

हे हनूमन्, त्वं वानरराजस्य किष्किन्धाधिपस्य सुग्रीवस्य सदृशः असि। प्रभावेण शक्त्या च रामलक्ष्मणयोः अपि तुल्यः असि।



**विग्रहः**

| | | |
|---|---|---|
| हरिराजस्य | - | हरीणां राजा हरिराजः, तस्य। |
| रामलक्ष्मणयोः | - | रामश्च लक्ष्मणश्च रामलक्ष्मणौ, तयोः। |

**व्याकरणविशेषः**

हरिराजः - नकारान्तः पुल्लिङ्गः राजन् शब्दः समासान्ते राज इति अकारान्तो भवति।

३. **बलं बुद्धिश्च तेजश्च सत्त्वं च हरिपुङ्गव।**
**विशिष्टं सर्वभूतेषु किमात्मानं न बुद्ध्यसे।।**

**पदच्छेदः**

| | | |
|---|---|---|
| बुद्धिश्च | - | बुद्धिः + च |
| तेजश्च | - | तेजः + च |
| विशिष्टं सर्वभूतेषु | - | विशिष्टम् + सर्वभूतेषु |
| आत्मानं न | - | आत्मानम् + न |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (हे) हरिपुङ्गव! | - | वानरश्रेष्ठ! |
| बलम् | - | कायशक्तिः |
| बुद्धिः | - | मतिः |
| तेजः | - | प्रभावः |
| सत्त्वं च | - | वीर्यातिशयः च |
| सर्वभूतेषु | - | सर्वप्राणिषु |
| विशिष्टम् | - | विशेषरूपेण युक्तम् |
| आत्मानम् | - | स्वम् |
| किं न बुद्ध्यसे | - | किं न प्रत्यभिजानीषे। |

**सारांशः**

शरीरशक्तिः, बुद्धिः, प्रभावः, वीर्यं चैते गुणाः सर्वेष्वपि प्राणिषु वर्तन्ते एव। परन्तु त्वं सर्वेभ्यः विभिन्नः इति कुतो न जानासि?

**विग्रहः**

| | | |
|---|---|---|
| हरिपुङ्गवः | - | पुमांश्चासौ गौश्च पुङ्गवः, हरिः पुङ्गवः इव। |
| सर्वभूतेषु | - | सर्वेषु भूतेषु। |

४. **मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः।**

**त्वं हि वायुसुतो वत्स प्लवने चापि तत्समः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| मारुतस्यौरसः | - | मारुतस्य + औरसः |
| पुत्रस्तेजसा | - | पुत्रः + तेजसा |
| चापि | - | च + अपि |
| वायुसुतो वत्स | - | वायुसुतः + वत्स |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| मारुतस्य | - | पवनस्य |
| औरसः | - | आत्मजः |
| पुत्रः | - | तनयः |
| तेजसा च | - | पराक्रमेण च |
| तत्समः अपि | - | तस्य समानः अपि। |
| वत्स! | - | पुत्र! |
| हि | - | यस्मात् कारणात् |
| त्वं वायुपुत्रः | - | त्वं वायोः पुत्रः |
| प्लवने | - | कूर्दने |
| तत्समः अपि(असि) | - | तस्य तुल्यः अपि(भवसि) |

**सारांशः**

हे वायुपुत्र! त्वं पराक्रमे वायोः तुल्यः असि। वेगे अपि त्वं तस्य समानः वर्तसे।

**विग्रहः**

तत्समः - तस्य समः/तेन समः।

वायुपुत्रः - वायोः पुत्रः।

औरसः - उरसः भवः।

५. **उत्तिष्ठ हरिशार्दूल! लङ्घयस्व महार्णवम्।**

**परा हि सर्वभूतानां हनूमन् या गतिस्तव।।**

**पदच्छेदः**

गतिस्तव - गतिः + तव।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (हे) हरिशार्दूल! | - | हे वानरश्रेष्ठ! |
| उत्तिष्ठ | - | उत्थानं कुरु |
| महार्णवम् | - | महासमुद्रम् |
| लङ्घयस्व | - | अतिक्रमस्व |
| हनूमन्! | - | अञ्जनासुत! |
| तव | - | ते |
| या गतिः(सा) | - | यः मार्गः(सः) |
| सर्वभूतानाम् | - | सर्वेषां जन्तूनाम् |
| परा हि | - | श्रेष्ठः एव। |

**सारांशः**

कपिश्रेष्ठ! त्वम् उत्तिष्ठ। समुद्रलङ्घनं कुरु। हे हनूमन्! तव गतिः सर्वजीविनां परमोत्कृष्टा भवति।

**विग्रहः**

हरिशार्दूलः - हरिः शार्दूल इव।

महार्णवम् - महान् च असौ अर्णवः च महार्णवः, तम्।

६.    **ततः कपीनामृषभेण चोदितः प्रतीतवेगः पवनात्मजः कपिः।**

**प्रहर्षयंस्तां हरिवीरवाहिनीं चकार रूपं पवनात्मजस्तदा।।**

**पदच्छेदः**

| | | |
|---|---|---|
| प्रहर्षयंस्ताम् | - | प्रहर्षयन् + ताम्। |
| रूपं पवनात्मजस्तदा | - | रूपम् + पवनात्मजः + तदा। |
| हरिवीरवाहिनीं चकार | - | हरिवीरवाहिनीम् + चकार। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| ततः | - | अनन्तरम् |
| कपीनाम् | - | वानराणाम् |
| ऋषभेण | - | श्रेष्ठेन |
| चोदितः | - | प्रेरितः |
| प्रतीतवेगः | - | ज्ञातवेगः |
| पवनात्मजः | - | पवनपुत्रः |
| कपिः | - | मर्कटः |
| तदा | - | तस्मिन् समये |
| तां हरिवीरवाहिनीं | - | तां वानरसेनाम् |
| प्रहर्षयन् | - | सन्तोषयन् |
| पवनात्मजः | - | हनूमान् |
| रूपं | - | स्वरूपम् |
| चकार | - | स्वीचकार। |



**सारांशः**

हनूमान् अतीव वेगवान् भवति। ऋक्षराजः जाम्बवान् तं स्ववाक्यैः प्रेरयामास। अनन्तरं वानरसेनां सन्तोषयन् हनूमान् स्वस्य वास्तविकं रूपं प्रदर्शयामास।

**विग्रहः**

| | | |
|---|---|---|
| प्रतीतवेगः | - | प्रतीतः वेगः यस्य सः। |
| पवनात्मजः | - | पवनस्य आत्मजः। |
| हरिवीरः | - | हरिषु वीरः। |
| हरिवीरवाहिनीम् | - | हरिवीराणां वाहिनी हरिवीरवाहिनी, ताम्। |

## पठनप्रवर्तनानि

- श्लोकान् समीचीनया रीत्या आलपतु।

    श्रद्धेयाः अंशाः

    उचितः तालः।

    अक्षरस्फुटता।

    आशयावबोधः।

- श्लोकानां अन्वयं लिखतु।

    श्रद्धेयौ अंशौ

    आशयावबोधः।

    उचितपदविन्यासपटुता।

- पाठभागात् संबोधनरूपाणि सञ्चित्य लिखतु।

    श्रद्धेयौ अंशौ

    आशयावबोधः।

    उचितपदचयनम्।

- पाठभागस्य आशयं गद्यरूपेण परिवर्त्य लिखतु।

    श्रद्धेयौ अंशौ

    उचितं शीर्षकम्।

    कथायाः शैली।

- पाठभागम् अनुबन्धं च पठित्वा क्रियापदानां धातुपदलकारपुरुषवचनानि विविच्य लिखतु।

    श्रद्धेयः अंशः

    विवेचनसामर्थ्यम्।

## अनुबन्धः।

**अव्ययानि।**

तूष्णीम् - सतीशः कक्ष्यायां तूष्णीम् उपविशति।

आश्रित्य - आ + श्रि धातोः ल्यबन्तम्।

सर्वे प्राणिनः जलम् आश्रित्य जीवन्ति।

## नामरूपाणि।

**तकारान्तः पुल्लिङ्गः हनूमत् शब्दः।**

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हनूमान् | हनूमन्तौ | हनूमन्तः |
| सं.प्रथमा | हे हनूमन्! | हे हनूमन्तौ! | हे हनूमन्तः! |
| द्वितीया | हनूमन्तम् | हनूमन्तौ | हनूमतः |
| तृतीया | हनूमता | हनूमद्भ्यां | हनूमद्भिः |
| चतुर्थी | हनूमते | हनूमद्भ्यां | हनूमद्भ्यः |
| पञ्चमी | हनूमतः | हनूमद्भ्यां | हनूमद्भ्यः |
| षष्ठी | हनूमतः | हनूमतोः | हनूमताम् |
| सप्तमी | हनूमति | हनूमतोः | हनूमत्सु। |

(हनूमान्, हनुमान् - द्वयमपि साधु)

एवं जाम्बवत् शब्दोऽपि।

## धातुरूपाणि।

**बुध् अवगमने धातुः, आ.प.लट्। (दिवादि)**

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र.पु. | बुध्यते | बुध्येते | बुध्यन्ते। |
| म.पु. | बुध्यसे | बुध्येथे | बुध्यध्वे। |
| उ.पु. | बुध्ये | बुध्यावहे | बुध्यामहे। |

### लघि अतिक्रमणे आ.प., लोट्।

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र.पु. | लङ्घयतां | लङ्घयेतां | लङ्घयन्ताम्। |
| म.पु. | लङ्घयस्व | लङ्घयेथां | लङ्घयध्वम्। |
| उ.पु. | लङ्घयै | लङ्घयावहै | लङ्घयामहै। |

### डु कृञ् करणे धातुः उभयपदी, प.प. लिट्।

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र.पु. | चकार | चक्रतुः | चक्रुः। |
| म.पु. | चकर्थ | चक्रथुः | चक्र। |
| उ.पु. | चकार/चकर | चकृव | चकृम। |

## अमरकोशः।

वीरः - शूरो वीरश्च विक्रान्तः।

समः - समस्तुल्यः सदृशः सदृक्षः सदृक् साधारणः समानश्च।

मारुतः - समीरमारुतमरुज्जगत्प्राणसमीरणाः।
नभस्वद्वातपवनपवमानप्रभञ्जनाः।।

## किमधिगतम्?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | श्लोकाः आलपिताः। | | | | |
| २. | अन्वयः लिखितः। | | | | |
| ३. | सम्बोधनरूपाणि लिखितानि। | | | | |
| ४. | गद्यरूपेण लिखितः। | | | | |
| ५. | धातुपदलकार-पुरुषवचनानि लिखितानि। | | | | |

*
*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# ४ आदर्शभूतः संस्कृतग्रामः।

*इयमाकाशवाणी। सम्प्रति वार्ताः श्रूयन्ताम्। प्रवाचकः - - - - - - - ! संस्कृतशब्दश्रवणमात्रेण एतानि वाक्यानि एव सामान्यजनानां मनसि स्फुरन्ति। समाजे संस्कृतभाषा कठिना, मृता इत्येवमादयः विरुद्धप्रचाराः प्रचलिताः दृश्यन्ते। एषाम् आक्षेपाणां निवारणेन एव संस्कृतभाषायाः प्रगतिः सञ्जायेत। तदर्थं कृतं कञ्चन परिश्रमम् अधिकृत्य पठामः।*

*डा. मुत्तलपुरं मोहनदासमहोदयस्य यात्राविवरणमवलम्ब्य सङ्कलितोऽयमंशः।*



तुङ्गभद्रायाः लालनेन अनुगृहीतः कश्चन ग्रामः!

प्राचीनसंस्कृतिं स्मारयन्तः वेदमन्त्रध्वनयः!

सूर्योदयात्पूर्वमेव कार्यरतानि भवनानि!

अनुशासनपूर्वकं नित्यानुष्ठानानि कुर्वन्तः बालाः!

स्वकर्मसु व्यापृताः कृषकाः!

गृहकार्यनिरताः महिलाः!

स्वोद्योगार्थं गच्छन्तः इतरे जनाः!

सुन्दरेऽस्मिन् ग्रामे सर्वेषां परस्परयोजनाय वर्तते किमपि सूत्रम्! संस्कृतम्! अनवरतं संस्कृतेन संभाषणं कुर्वतां जनानां ग्रामोऽयम्। आम्, अयमेव बहुचर्चितः 'मत्तूरु' संस्कृतग्रामः।

कर्णाटकराज्यस्य 'शिवमुग्गा' जिल्लायाम् अयं ग्रामः वर्तते। जिल्लाकेन्द्रात् अष्ट (८) कि.मी. परिमिते दूरे वर्तमानस्य मत्तूरुग्रामस्य विस्तृतिः त्रिसहस्रं(३०००) 'एकर्'मिता भवति। उपत्रिशतैः गृहैः वर्तमानस्यास्य ग्रामस्य जनसंख्या उपपञ्चसहस्राः भवेत्।



१९८२ तमे वर्षे मत्तूरुग्रामे संस्कृतपठनपाठनप्रचारणकार्यक्रमाः आरब्धाः। भेदभावनां विना सर्वेभ्यो जनेभ्यः संस्कृतसम्भाषणस्य परिशीलनं प्रदत्तम्। कक्ष्यासञ्चालनाय योग्याः समर्पितचित्ताः बहवः शिक्षकाः प्रयतितवन्तः। भाषाशिक्षणात्परम् अध्येतृभ्यः काव्यशास्त्रपुराणादीनामपि प्रशिक्षणं तैः विहितम्। अध्येतार एव कालान्तरे प्रशिक्षकाः अभवन्। एवं संस्कृतपठनपाठनकार्यमिदं चाक्रिकरूपेण तत्र प्रवर्तते। सर्वस्याप्यस्य यत्नस्य परिणामरूपोऽयं संस्कृतग्रामः।

ग्रामस्यास्य वृत्तान्तं जानन्तः बहवः भाषाकुतुकिनः मत्तूरुग्रामं सम्पश्यन्ति। संस्कृतचित्तैः पूर्णेऽस्मिन् ग्रामे अपराधाः प्रायेण न्यूनाः वर्तन्ते। विषया एते सर्वेषां जनानां मनांसि हठादाकर्षन्ति। इदानीं भारतस्य विविधेषु देशेषु मत्तूरुपरीक्षणं प्रचलति।

**पदच्छेदः**

सुन्दरेऽस्मिन् - सुन्दरे + अस्मिन्

सर्वेषां परस्परयोजनाय - सर्वेषाम् + परस्परयोजनाय

संभाषणं कुर्वतां जनानां ग्रामोऽयम् - संभाषणम् + कुर्वताम् + जनानाम् + ग्रामः + अयम्

परिणामरूपोऽयम् - परिणामरूपः + अयम्

सैव - सा + एव

पूर्णेऽस्मिन् - पूर्णे + अस्मिन्

ग्रामस्यास्य - ग्रामस्य + अस्य।

हठादाकर्षति - हठात् + आकर्षति।

## विग्रहाः।

प्राचीनसंस्कृतिम् - प्राचीना संस्कृतिः प्राचीनसंस्कृतिः, ताम्।

वेदमन्त्रध्वनयः - वेदरूपाः मन्त्राः वेदमन्त्राः, तेषां ध्वनयः।

कार्यरतानि - कार्येषु रतानि।

गृहकार्यनिरताः - गृहस्य कार्याणि गृहकार्याणि, तेषु निरताः।

समर्पितचित्ताः - समर्पितानि चित्तानि यैः ते।

उपत्रिशताः - त्रिशतस्य समीपे ये विद्यन्ते ते।

## पठनप्रवर्तनानि।

- पाठभागं पठित्वा प्रदत्तानां शब्दानां समानार्थकपदानि सञ्चित्य लिखतु।

  शब्दाः, वार्ताः, भाषातत्पराः, विस्तारः, अन्येजनाः

  श्रद्धेयौ अंशौ

  उचितपदचयनम्।

  आशयावबोधः।

- पाठभागं पठित्वा अधो दत्तां प्रश्नावलीम् उचितोत्तरैः पूरयतु।

  मत्तूर् ग्रामः कस्मिन् राज्ये?

  कस्यां जिल्लायाम्?

  कस्याः नद्यास्तीरे?

  जिल्लाकेन्द्रात्कियद्दूरे?

  ग्रामविस्तृतिः?

ग्रामे जनसंख्या ?

जनानां व्यवहारभाषा ?

संस्कृतप्रचारणकार्यक्रमाः

कस्मिन् वर्षे प्रारब्धाः ?

- चित्रं निरीक्ष्य विक्रेतुः क्रेतुः च सम्भाषणं सम्भाव्य लिखतु, अवतारयतु च।



श्रद्धेयाः अंशाः

सरलसंस्कृतशब्दानाम् उपयोगः।

पदानां परस्परसम्बन्धः।

परस्परव्यवहारः।

- युष्माभिः कृतां कामपि यात्रामधिकृत्य एकं लघुविवरणं लिखतु।

श्रद्धेयाः अंशाः

वाक्यघटना।

आशयपूर्णता।

यात्रायाः अनुभवाः।

## अनुबन्धः ।

### शब्दकोशः ।

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| स्मारयन्तः | स्मरणं कारयन्तः | ഓർമിപ്പിക്കുന്ന | ನೆನಪುಮಾಡಿಸುತ್ತಿರುವ | reminding |
| ध्वनयः | शब्दाः | ശബ്ദങ്ങൾ | ಶಬ್ದಗಳು | sounds |
| कार्यरतानि | कार्यमग्नानि | പ്രവൃത്തിയിൽ മുഴുകിയ | ಕಾರ್ಯನಿರತವಾದವುಗಳು | immersed in work |
| अनुशासनपूर्वकम् | नियमपालनपूर्वकम् | നിയമം പാലിച്ച് | ಶಿಸ್ತುಬದ್ಧವಾಗಿ | in a disciplined manner |
| व्यापृताः | निरताः | മുഴുകിയവർ | ತಲ್ಲೀನರಾದವರು | engrossed |
| इतरे जनाः | अन्ये जनाः | മറ്റുള്ളവർ | ಇತರಜನರು | others |
| सूत्रम् | तन्तुः | ചരട് | ನೂಲು | thread |
| उपत्रिशताः | त्रिशतस्य समीपे वर्तमानम् | മുന്നൂറോളം | ಮುನೂ□ರ ಹತ್ತಿರ | approxiately three hundred |
| प्रदत्तम् | दत्तम् | കൊടുത്തത് | ಕೊಡಲ್ಪಟ್ಟಿದೆ | given |
| समर्पितचित्ताः | मनसः समर्पणं कृतवन्तः | സമർപ്പിതചിത്തർ | ಅರ್ಪಣಾ ಮನೋಭಾವದವರು | people with dedicated mind |
| प्रयतितवन्तः | प्रयत्नं कृतवन्तः | പ്രയത്നിച്ചവർ | ಪ್ರಯತ□ಮಾಡಿರುವವರು | those who took efforts |
| प्रशिक्षणम् | प्रकृष्टं परिशीलनम् | വിദഗ്ധപരിശീലനം | ವಿಶೇಷತರಬೇತಿ | training |
| सङ्घटितयत्नेन | सम्भूय परिश्रमेण | ഒരുമിച്ചുള്ള പരിശ്രമം കൊണ്ട് | ಸಂಘಟಿತಯತ□ದಿಂದ | with team work |
| वृत्तान्तम् | वार्ताम् | വാർത്തയെ | ವಾರ್ತೆ | news |
| भाषाकुतुकिनः | भाषातत्पराः | ഭാഷാതത്പരർ | ಭಾಷಾಸಕ್ತರು | language enthusiasts |
| हठात् | बलात् | ബലമായി | ಒಮ್ಮೆಲೆ | forcibly |

## नामरूपाणि ।

### डु कृञ् धातोः शत्रन्तम् ।(पुल्लिङ्गे)

| विभक्तिः | ए. व | द्वि. व | ब.व |
|---|---|---|---|
| प्रथमा | कुर्वन् | कुर्वन्तौ | कुर्वन्तः |
| सं.प्रथमा | हे कुर्वन् | हे कुर्वन्तौ | हे कुर्वन्तः |
| द्वितीया | कुर्वन्तं | कुर्वन्तौ | कुर्वतः |



| | | | |
|---|---|---|---|
| तृतीया | कुर्वता | कुर्वद्भ्यां | कुर्वद्भिः |
| चतुर्थी | कुर्वते | कुर्वद्भ्यां | कुर्वद्भ्यः |
| पञ्चमी | कुर्वतः | कुर्वद्भ्यां | कुर्वद्भ्यः |
| षष्ठी | कुर्वतः | कुर्वतोः | कुर्वताम् |
| सप्तमी | कुर्वति | कुर्वतोः | कुर्वत्सु। |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | पदानि चितानि। | | | | |
| २. | पट्टिका पूरिता। | | | | |
| ३. | सम्भाषणं रचितम्। | | | | |
| ४. | यात्राविवरणं लिखितम्। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन।*



# ५ शरीरमाद्यं खलु धर्मसाधनम्।

*मनुष्याणां परा सम्पद् भवति आरोग्यम्। आरोग्याय शुद्धो वायुः, शुद्धं जलं, हितम् अन्नं च अवश्यमपेक्षितानि। व्यक्तेः आरोग्यं तस्याः शीलमवलम्बते। पूर्वे जनाः आरोग्यसंरक्षणरीतिं सम्यक् ज्ञातवन्तः आसन्। आरोग्यसम्बन्धीनि कानिचन सुभाषितानि अधः दीयन्ते।*

१. **मनःशौचं कर्मशौचं कुलशौचं तथैव च।**
**शरीरशौचं वाक्शौचं शौचं पञ्चविधं स्मृतम्।।**

**पदच्छेदः।**

तथैव - तथा + एव।

**विग्रहः**

मनःशौचम् - शुचेः भावः शौचम्, मनसः शौचम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| कर्मशौचं | - | कर्मणः शुचित्वम् |
| कुलशौचं | - | कुलस्य शुचित्वम् |
| तथा एव | - | एवमेव |
| मनः शौचं | - | मनसः शुचित्वम् |
| शरीरशौचं | - | शरीरस्य शुचित्वम् |
| वाक्शौचं च | - | वाचः शुचित्वं च |
| पञ्चविधं | - | पञ्चप्रकारं |
| स्मृतम् | - | प्रोक्तम्। |

**आशयः**

लोकेऽस्मिन् पञ्चविधं शुचित्वं प्रसिद्धं भवति। कर्मशुचित्वं, कुलशुचित्वं, चित्तशुचित्वं, शरीरशुचित्वं, भाषणशुचित्वं चेति।



**२. लाघवं कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता।**
**दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।।**

**पदच्छेदः**

दोषक्षयोऽग्निवृद्धिश्च - दोषक्षयः अग्निवृद्धिः च।
व्यायामादुपजायते - व्यायामात् उपजायते।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| लाघवम् | - | लघुत्वम् |
| कर्मसामर्थ्यम् | - | कर्मकौशलम् |
| स्थैर्यम् | - | स्थिरता |
| क्लेशसहिष्णुता | - | क्लेशसहनक्षमता |
| दोषक्षयः | - | त्रिदोषसमत्वम् |
| अग्निवृद्धिः च | - | कायाग्निसन्दीपनं च |
| व्यायामात् उपजायते | - | व्यायामात् सञ्जायते। |

**आशयः**

शरीरस्य लाघवं, कर्मकौशलम्, स्थिरता, वातपित्तकफदोषाणां साम्यम्, कायाग्निसन्दीपनं च व्यायामात् सञ्जायन्ते। अतः व्यायामः कार्यः।

**३. न रागान्नाप्यविज्ञानादाहारानुपयोजयेत्।**
**परीक्ष्य हितमश्नीयात् देहो ह्याहारसम्भवः।।**

**पदच्छेदः**

रागान्नाप्यविज्ञानादाहारानुपयोजयेत् -रागात् न अपि अविज्ञानात् आहारान् उपयोजयेत्

देहोह्याहारसम्भवः - देहः हि आहारसम्भवः

| अन्वयः | | अर्थः |
|---|---|---|
| रागात् | - | प्रीत्या |
| आहारान् | - | भक्षणपदार्थान् |
| न उपयोजयेत् | - | न स्वीकुर्यात्। |
| अविज्ञानात् अपि न | - | अज्ञानाद् अपि न। |
| परीक्ष्य | - | परीक्षणं कृत्वा |
| हितम् | - | पथ्यम् |
| अश्नीयात् | - | भक्षयेत्। |
| हि | - | यतः |
| देहः | - | शरीरम् (कायः) |
| आहारसम्भवः | - | आहारात् जातः। |

**आशयः**

रसनायाः लोलुपतया अज्ञानात् वा भक्षणपदार्थानाम् अमितम् उपयोगं न कुर्यात्। सम्यक् विचिन्त्य पथ्यम् एव भक्षयेत्। यतः आहारात् एव शरीरस्य उत्पत्तिः सुस्थितिश्च।

**४. अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा।**
**मद्यं त्रिवर्गधीधैर्यलज्जादेरपि नाशनम्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| त्रिवर्गधीधैर्यलज्जादेरपि | - | त्रिवर्गधीधैर्यलज्जादेः अपि |

| अन्वयः | | अर्थः |
|---|---|---|
| अयुक्तियुक्तम् अन्नम् | - | अतिमात्रं भक्षणम् |
| व्याधये | - | रोगाय |
| मरणाय च (भवति) | - | मृत्यवे च (कारणं भवति) |
| मद्यं तु | - | सुरा तु |

| | | |
|---|---|---|
| त्रिवर्गधीधैर्यलज्जादेः अपि | - | त्रिवर्गस्य (धर्मार्थकामानां) बुद्धेः, धैर्यस्य, ह्रियः शौचादीनाम् अन्येषामपि |
| नाशनं(भवति) | - | नाशकारणं भवति। |

**विग्रहः।**

| | | |
|---|---|---|
| त्रिवर्गधीधैर्यलज्जादेः | - | त्रयाणां वर्गः त्रिवर्गः, त्रिवर्गः धीः धैर्यं लज्जा आदिः यस्य सः त्रिवर्गधीधैर्यलज्जादिः, तस्य। |
| मद्यम् | - | मद्यते अनेन इति। |

**आशयः**

आहारस्य क्रमराहित्येन रोगाः जायन्ते। रोगेभ्यः मरणञ्च भविष्यति। मद्यस्य उपभोगः तु धर्मार्थकामबुद्धिधैर्यलज्जादीनाम् अपि नाशकारणं भवति। अतः मद्यं न सेवनीयम्।

५. **सर्वमेव परित्यज्य शरीरमनुपालयेत्।**
**शरीरस्य प्रणष्टस्य सर्वमेव विनश्यति।।**

| अन्वयः | | अर्थः |
|---|---|---|
| सर्वम् | - | समस्तम् |
| परित्यज्य | - | विहाय |
| शरीरम् एव | - | गात्रम् एव |
| अनुपालयेत् | - | संरक्षेत् |
| शरीरस्य प्रणष्टस्य | - | यस्य शरीरं विनष्टं, तस्य |
| सर्वमेव | - | समस्तमेव |
| विनश्यति | - | नाशं प्राप्नोति। |

**आशयः**

स्वकीयस्य सर्वस्य धनस्य व्ययेनापि आरोग्यसंरक्षणं कर्तव्यम्। किमर्थमिति चेत् शरीरनाशे सर्वमपि नश्यति। धर्मार्थकाममोक्षाणां पुरुषार्थानां लाभार्थं स्वस्थं शरीरम् आवश्यकमेव। 'शरीरमाद्यं खलु धर्मसाधनम्' इति कविवचनं प्रसिद्धं खलु!

## पठनप्रवर्तनानि ।

- सुभाषितानि सतालम् आलपतु ।

  श्रद्धेयाः अंशाः -

  अक्षरस्फुटता ।

  उचितः तालः ।

  आशयव्यक्तता ।

- 'अयुक्तियुक्तमन्नं मद्यं च आरोग्यं बाधते'- चर्चां कृत्वा लघुटिप्पणीं लिखतु ।

  श्रद्धेयाः अंशाः -

  भागभागित्वम् ।

  युक्तिपूर्वकं भाषणम् ।

  आशयक्रमीकरणम् ।

- व्यायामस्य गुणान् अधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु ।

  श्रद्धेयाः अंशाः -

  सयुक्तिकं प्रतिपादनम् ।

  भागभागित्वम् ।

  आशयावगमनम् ।

- आरोग्यसम्बन्धीनि सुभाषितानि स्फोरकपत्रे विलिख्य प्रदर्शयतु ।

  श्रद्धेयाः अंशाः -

  विषयानुसारं क्रमीकरणम् ।

  आशयावबोधः ।

  चयनसामर्थ्यम् ।

  प्रदर्शनम् ।

■ सुभाषितानाम् आशयं स्ववाक्यैः लिखतु।

श्रद्धेयाः अंशाः -

उचितभाषाप्रयोगः।

आशयव्यक्तता।

संगृह्य लेखनम्।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १. | सुभाषितानि आलपितानि। | | | | |
| २. | चर्चा कृता टिप्पण्यौ लिखिते। | | | | |
| ३. | स्फोरकपत्राणि यथानिर्देशं सज्जीकृतानि प्रदर्शितानि। | | | | |
| ४. | आशयाः लिखिताः। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन।*

# ६ पुत्रोऽहं पृथिव्याः

*प्रकृतिः अतिमनोहारिणी। सर्वाणि जीवजालानि तामुपजीव्य एव वर्तन्ते। प्रकृत्या सह तादात्म्यभावः यदा भवति तदैव जीवनम् आनन्दकरं जायते। मानवाः एव स्वार्थाय प्रकृतेः उपभोगं कुर्वन्ति। अस्मिन् प्रपञ्चे न केवलं मनुष्याणाम् अपि तु अन्येषामपि अधिकारः अस्ति।*

**रङ्गः -१**

(नेपथ्ये)

मधुवाता ऋतायते
मधु क्षरन्ति सिन्धवः।
माध्वीर्नः सन्त्वोषधीः।

(ऋग्वेद :)

(वेदिकायां जलाशयसहितस्य वनस्य दृश्यम्)

सूत्रधारः (प्रविश्य) भोः! कलास्वादकाः! एषः प्रकृतिचूषणस्य कालः। मनुजानां प्रवृत्तिं सोढुमशक्ताः पक्षिमृगादयोऽपि प्रतिषेधाय प्रवृत्ताः दृश्यन्ते। तद्विषये आस्वदामहै किमपि लघुरूपकम्।

(सूत्रधारः गच्छति। जन्तुवेषधारिणः (कोकिलः, काकः, मयूरः, हरिणः, कूर्मः, भल्लूकश्च) प्रविश्य मिलित्वा गानानुसारं नृत्यन्ति)।



आगच्छन्तु सर्वेऽप्यागच्छन्तु

मोहनसुन्दरकाननान्ते।

आगच्छन्तु सर्वेऽप्यागच्छन्तु

गायन्तु नृत्यन्तु मोदपूर्वम्।।

(इति द्विवारं गायन्ति नृत्यन्ति अन्तः गच्छन्ति च)

(कोकिलः मयूरः च प्रविशतः)

कोकिलः- अहो! कियत् रमणीयं प्रभातम्! (परितः अवलोक्य) भोः! तत्र पश्यत! मनोहराणि चूतपुष्पाणि।

(सर्वे पश्यन्ति)

मयूरः - (काकं प्रति) अहो सुन्दरम्। तत्र गच्छावः।

काकः - आम्। गच्छावः। अन्यानपि आह्वयामि।

(आह्वयति) भोः आगच्छथ! आगच्छथ!

हरिणः - (कूर्मेण सह आगत्य) आम्। अहमागच्छामि। मूषकः कुत्र?

कूर्मः - अहमपि तमेव अन्विष्यामि। कुत्रागच्छत् सः?

(सर्वे इतस्ततः अवलोकयन्ति)

भल्लूकः - (प्रविश्य) ज्ञातवन्तः वा? अस्माकं मूषकः - - - रोगबाधितः - - - चलितुमप्यशक्तः - - - - बिले एव शयितः।

हरिणः - अहो! कष्टम्। तर्हि वयं तं द्रष्टुं गच्छामः।

सर्वे - गच्छामो वयं गच्छामः

मूषकं द्रष्टुं गच्छामः।

करणीया भोः! करणीया

सुहृदः सेवा करणीया।।

(गानेन वेदिकायां चलन्ति)

(नेपथ्ये मूषकस्वनम्)

काकः - (कर्णं दत्वा) हन्त! अस्माकं मूषकस्य क्रन्दनं खलु।

सर्वे - हा! किमभवत्? तस्य किमभवत्?

(नेपथ्ये - यन्त्राणां ध्वनिः, वृक्षपतनस्य ध्वनिः, पक्षिणां ध्वनिः च। महान् कोलाहलः श्रूयते।)

सर्वे - अहो! किमेतत्? किमेतत्?

(नेपथ्ये)

हा! हन्त हन्त! मनुजस्तव चेष्टितानि।

नूनं भवन्त्यखिलजीवविनाशहेतुः।। (द्विवारम्)



**रङ्गः - २**

(नाशितस्य वनस्य दृश्यम्। तत्र वृक्षाणाम् अवशिष्टानि)

(मयूरः भल्लूकः च प्रविशतः)

मयूरः - (सशोकम्) कीदृशीयं दुरवस्था?

भल्लूकः- (सशोकम्) मनुष्याणां स्वार्थतया अस्माकं वासस्थानानि, वृक्षाः ,जलाशयाः, सर्वाणि नष्टानि जातानि। (तौ गच्छतः)

(ततः त्रयः पुरुषाः प्रविश्य भवननिर्माणस्य आसूत्रणं कुर्वन्ति।)

प्रथमः - पञ्चसहस्रजनानां वासयोग्यम् अम्बरचुम्बि भवनम् अत्रैव कार्यम्।

द्वितीयः - मार्गः अत्रैव उचितः।

(तृतीयः चिन्तामग्नः तिष्ठति)

द्वितीयः - (तृतीयं प्रति) भवान् किं चिन्तयति?

तृतीयः - पञ्चसहस्रं जनाः! एतेभ्यः पानाय जलं कुत्र? आहारः? प्राणवायुः - - - ?

प्रथमः - पश्य, पश्य, जन्तवः आगच्छन्ति।

(स्फोरकफलकानि गृहीत्वा भल्लूकः, कोकिलः, कूर्मः, मयूरश्च प्रविशन्ति।)

सर्वे भूमेः अधिकारिणः।

माता भूमिः पुत्रोऽहं पृथिव्याः।

भल्लूकः - किं कुर्वन्ति भवन्तः? भूमीदेव्याः वरदानरूपाः उन्नतशिरस्काः पर्वताः - - -

कोकिलः - शुद्धवायुदातारः परोपकारिणः वटवृक्षाः - - -

कूर्मः - शुद्धजलसमृद्धाः जलाशयाः - - - -

भल्लूकः - मधुरफलसमृद्धाः वृक्षलतादयः, तदाश्रिताः मधुपाः - - -

मयूरः - नृत्तयोग्याः हरितमनोहराः तटप्रदेशाः - - -

सर्वे - एतत्सर्वं क्व गतम्? (त्रिवारम्)

(श्रुत्वैतत् मनुष्याः स्तब्धाः)

(नेपथ्ये)

(हे मनुष्य! स्वार्थतायै सर्वमपहरसि। तदा प्रकृतेः जीवनतालभङ्गं त्वं नावगच्छसि। तव चूषणं सर्वे ज्ञातवन्तः। एषा धरा न केवलं त्वदीया। किन्तु सर्वे भूमेः अधिकारिणः।)

(मनुष्याः अपि स्फोरकफलकं स्वीकृत्य तिष्ठन्ति।)

(भरतवाक्यम्)

अद्यापि रमणीया हि<br>
सृष्टिरेषा जगत्पतेः।<br>
जीवाः सर्वेऽत्र मोदन्तां<br>
भावयन्तः परस्परम्।।

(सर्वे निष्क्रान्ताः)

## पदच्छेदः

| | | |
|---|---|---|
| तदैव | - | तदा + एव |
| मनुजानां प्रवृत्तिं सोढुम् | - | मनुजानाम् + प्रवृत्तिम् + सोढुम् |
| पक्षिमृगादयोऽपि | - | पक्षिमृगादयः + अपि |
| इतस्ततः | - | इतः + ततः |
| क्रन्दनं खलु | - | क्रन्दनम् + खलु |
| पक्षिणां शब्दः | - | पक्षिणाम् + शब्दः |
| मनुजस्तव | - | मनुजः + तव |
| कीदृशीयम् | - | कीदृशी + इयम् |
| अत्रैव | - | अत्र + एव |
| मयूरश्च | - | मयूरः + च |
| अद्यापि | - | अद्य + अपि |
| सृष्टिरेषा | - | सृष्टिः + एषा |
| माध्वीर्नः | - | माध्वीः + नः |
| सन्त्वोषधीः | - | सन्तु + ओषधीः |
| सर्वेऽत्र | - | सर्वे + अत्र |
| गतान्येतानि | - | गतानि + एतानि |
| श्रुत्वैतत् | - | श्रुत्वा + एतत् |
| नावगच्छामि | - | न + अवगच्छामि |

## विग्रहः

त्वदीया - तव इयम्।

## पठनप्रवर्तनानि

- पाठभागं पठित्वा उचितानि धातुरूपाणि पट्टिकायां निवेशयतु।

  परस्मैपदे लट् लकारः प्रथमपुरुषः।

| धातुः | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| गम् | | | गच्छन्ति |
| नृत् | नृत्यति | | |
| चल् | | चलतः | |
| स्था | तिष्ठति | | |
| गै | | गायतः | |

- लघुरूपकं पठित्वा कथापात्राणां वैशिष्ट्यानि कानि इति चर्चां कुर्वन्तु।

  श्रद्धेयाः अंशाः

  पात्रस्वभावावगमनम्।

  भागभागित्वम्।

  क्रोडीकरणम्।

- रूपकमिदं कथारूपेण परिवर्तयतु।

  श्रद्धेयाः अंशाः

  कथाशैली।

  भाषाप्रयोगः।

  उचितशीर्षकम्।

- लघुरूपकस्य रङ्गाविष्कारं कुर्वन्तु।



- लघुरूपकस्य रङ्गाविष्कारं कुर्वन्तु।

  श्रद्धेयाः अंशाः

  उचितः वेषः।

  अक्षरस्फुटता।

  उचितभावः।

- परिस्थितिसंरक्षणस्य प्राधान्यमधिकृत्य चर्चां कृत्वा लघूपन्यासं लिखतु।

  श्रद्धेयाः अंशाः

  विषयबन्धः।

  उचितभाषाप्रयोगः।

  उपन्यासघटनास्वीकारः।

- प्रकृतिसंरक्षणार्थं स्फोरकपत्राणि सज्जीकरोतु।

  श्रद्धेयौ अंशौ

  विषयबन्धः।

  उचितभाषाप्रयोगः।

## अनुबन्धः।

### शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| उपजीव्य | आश्रित्य | ആശ്രയിച്ചിട്ട് | ಆಶ್ರಯಿಸಿ | being dependendent on |
| तादात्म्यभावः | इतरेतरयोगः | പരസ്പരാശ്രയത്വം | ಪರಸ್ಪರ ಒಂದೆಂಬ ಭಾವನೆ | inseparability |
| सोढुम् | सहनं कर्तुम् | സഹിക്കുവാൻ | ಸಹಿಸಲು | to bear |
| स्फोरकफलकम् | विज्ञप्तिपत्रम् | വിളംബരപത്രം | ಘೋಷಣಾ ಫಲಕ | placard |
| क्व | कुत्र | എവിടെ | ಎಲ್ಲಿ | where |



| | | |
|---|---|---|
| परितः | - | 'परितः' शब्दयोगे द्वितीया विभक्तिः प्रयोक्तव्या। |
| | | पुष्पं परितः भृङ्गाः सञ्चरन्ति। |
| यदा - तदा | - | यदा दीपः ज्वलति, तदा प्रकाशः प्रसरति। |
| न केवलम् - अपितु | - | श्रीनारायणगुरुः न केवलं समाजपरिष्कर्ता, अपितु संन्यासी च आसीत्। |

### तकारान्तः त्रिलिङ्गकः एतच्छब्दः। नपुंसकलिङ्गे -

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत्/एनत् | एते/एने | एतानि/एनानि |
| तृतीया | एतेन/एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः/एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः/एनयोः | एतेषु। |

### दकारान्तः अस्मद् शब्दः त्रिषु लिङ्गेषु समानः।

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्(मा) | आवाम्(नौ) | अस्मान्(नः) |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्(मे) | आवाभ्याम्(नौ) | अस्मभ्यम्(नः) |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम(मे) | आवयोः(नौ) | अस्माकम्(नः) |
| सप्तमी | मयि | आवयोः | अस्मासु। |



❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १. | निर्देशानुसारं पट्टिका पूरिता। | | | | |
| २. | चर्चा कृता। | | | | |
| ३. | कथारूपेण परिवर्तितम्। | | | | |
| ४. | रूपकस्य रङ्गाविष्कारः कृतः। | | | | |
| ५. | उपन्यासः लिखितः। | | | | |
| ६. | स्फोरकपत्राणि सज्जीकृतानि, प्रदर्शितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# ७ श्रमप्रधानो लोकः

*कथाः उत्तमगुणानाम् उद्बोधिकाः भवन्ति। संस्कृतसाहित्ये कथानां महान् सञ्चयः वर्तते। अनायासेन तदन्तर्गताः गुणपाठाः मनसि प्रविशन्ति। तादृशीं काञ्चित् कथां पठामः।*

पाटलीपुत्रनामके नगरे विद्याधरो नाम पण्डितः वसति स्म। तस्य अनेके शिष्याः आसन्। तेषु द्वयोः मध्ये एकदा "कः गुरोः प्रियतरः" इति चर्चा प्रवृत्ता। विषयमिमं ज्ञात्वा आचार्यः तौ परीक्षितुमिच्छन् उभाभ्यां मुष्टिपरिमितान् चणकान् दत्वा निरदिशत् - "वत्सौ! एषाम् उत्तमम् उपयोगं कुरुतम्" इति।



द्वित्राणि वर्षाणि अतीतानि। एकदा आचार्यः प्रथमशिष्यस्य गृहं प्राप्य तम् अपृच्छत् - "वत्स! चणकानाम् उपयोगं कथं कृतवान्"इति। शिष्यः गुरुं स्वस्य पूजाप्रकोष्ठं नीत्वा अवदत् -

"गुरो! भवता दत्तान् चणकान् नित्यमहं सादरं पूजयामि" इति। पूजाप्रकोष्ठे स्थापितान् तान् चणकान् दृष्ट्वा आचार्यस्य नेत्राभ्याम् अश्रूणि निर्गतानि, यतः ते जीर्णाः आसन्।



आचार्यः ततः द्वितीयस्य शिष्यस्य गृहम् अगच्छत्। चणकानाम् उपयोगविधिम् अपृच्छत् च। शिष्यस्तु-

"गुरो! तेषां चणकानां वपनेन प्रभूतं धान्यमहं प्राप्तवान्" इति वदन् आचार्यं गृहात् बहिः नीत्वा स्वस्य विशालं क्षेत्रम् अदर्शयत्। यदा आचार्यः धान्यसमृद्धं क्षेत्रम् अपश्यत् तदा तस्य नेत्रे अश्रूणि अमुञ्चताम्। सः शिष्यम् अभिनन्द्य तस्मै पारितोषिकमपि दत्वा ततः अगच्छत्। उक्तञ्च-

श्रमेण धान्यं च श्रमेण भाग्यं
श्रमेण विद्याञ्च श्रमेण वित्तम्।
श्रमेण विन्दन्ति सुखानि लोकाः
मनुष्यलोके हि श्रमः प्रधानम्।।

## पदच्छेदः

विद्याधरो नाम - विद्याधरः + नाम

शिष्यस्तु - शिष्यः + तु

विद्याञ्च - विद्याम् + च

उक्तञ्च - उक्तम् + च

## विग्रहः

पूजाप्रकोष्ठम् - पूजायाः प्रकोष्ठः पूजाप्रकोष्ठः, तम्।

उपयोगविधिम् - उपयोगस्य विधिः उपयोगविधिः, तम्।

धान्यसमृद्धम् - धान्यैः समृद्धः धान्यसमृद्धः, तम्।

आनन्दाश्रूणि - आनन्दस्य अश्रूणि।

मनुष्यलोके - मनुष्याणां लोकः मनुष्यलोकः, तस्मिन्।

## पठनप्रवर्तनानि।

- पाठभागं पठित्वा आचार्यशिष्ययोः सम्भाषणं सम्भाव्य लिखतु।

  श्रद्धेयौ अंशौ

  आशयस्पष्टता।

  सम्भाषणशैली।

- आचार्यस्य नेत्रयोः द्विवारम् अश्रूणि निर्गतानि। केन कारणेन? चर्चां करोतु।

  श्रद्धेयौ अंशौ

  आशयस्पष्टता।

  भागभागित्वम्।

- एतां कथां स्ववाक्यैः कक्ष्यायाम् अवतारयतु।

  श्रद्धेयौ अंशौ

  कथाकथनशैली।

  आशयस्पष्टता।

- पाठभागात् अव्ययपदानि चित्वा पट्टिकायां निवेशयतु।

| क्त्वान्तानि | ल्यबन्तानि | तुमुन्नन्तानि | अव्ययानि |
| --- | --- | --- | --- |
| | | | |

- अधो दत्तानि वाक्यानि 'यदा-तदा' उपयुज्य उदाहरणानुसारं लिखतु।

उदा - राजा सभां प्रविशति। सर्वे उत्तिष्ठन्ति।

यदा राजा सभां प्रविशति तदा सर्वे उत्तिष्ठन्ति।

१. आचार्यः गृहम् आगच्छत्। शिष्यः पूजाप्रकोष्ठम् अदर्शयत्।

२. गुरुः क्षेत्रं दृष्टवान्। तस्य नेत्रे अश्रूणि अमुञ्चताम्।

- पाठभागस्थस्य अमुञ्चताम् इति क्रियापदस्य कानिचन रूपाणि अधो दत्तानि सन्ति। अन्यानि रूपाणि लिखतु।

| | ए.व. | द्वि.व. | ब.व. |
| --- | --- | --- | --- |
| प्र.पु. | - - - - - | अमुञ्चताम् | - - - - |
| म.पु. | - - - - - | - - - - - - | अमुञ्चत |
| उ.पु. | अमुञ्चम् | - - - - - - | - - - - - |

- चित्रं दृष्ट्वा पञ्च वाक्यानि लिखतु।



## अनुबन्धः ।

**शब्दकोशः**

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| प्रवृत्ता | अभवत् | സംഭവിച്ചു | ಆಯಿತು | happened |
| मुष्टिपरिमितान् | एकमुष्टिपरिमाणान् | ഒരുപിടി | ಒಂದು ಮುಷ್ಟಿಯಷ್ಟು | a fistful |
| चणकः | हरिमन्थकः | കടല | ಕಡಲೆ | chick peas |
| निरदिशत् | निर्देशम् अयच्छत् | നിർദേശിച്ചു | ಸೂಚಿಸಿದನು | directed |
| अतीतानि | गतानि | കടന്നുപോയി | ಕಳೆದವು | elapsed |
| पूजाप्रकोष्ठम् | पूजाकक्षम् | പൂജാമുറിയെ | ಪೂಜೆಯಕೋಣೆ | to the prayer room |
| जीर्णाः | शीर्णाः | ജീർണിച്ചവ | ಹಾಳಾದಂತಹ | rotten |
| अभिनन्द्य | प्रतिनन्द्य | അഭിനന്ദിച്ചിട്ട് | ಆದರಿಸಿ | having congratulated |
| श्रमेण | उद्यमेन | പ്രയത്നത്താൽ | ಪ್ರಯತ್ನದಿಂದ | with effort |
| विन्दन्ति | प्राप्नुवन्ति | നേടുന്നു | ಪಡೆಯುತ್ತಾರೆ | attain |

## अमरकोशः ।

सागरः - समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।

उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः।।

चणकः - चणको हरिमन्थकः।

अश्रु - अश्रु नेत्राम्बु रोदनं चास्रमश्रु च।

क्षेत्रम् - वप्रः केदारः क्षेत्रम्।

## धातुरूपाणि।

**निर् + दिश् अतिसर्जने प.प.लङ्।**

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र. पु | निरदिशत् | निरदिशतां | निरदिशन् |
| म. पु | निरदिशः | निरदिशतं | निरदिशत |
| उ. पु | निरदिशं | निरदिशाव | निरदिशाम। |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | निर्देशानुसारं संभाषणं लिखितम्। | | | | |
| २. | चर्चा कृता। | | | | |
| ३. | कथा अवतारिता। | | | | |
| ४. | पट्टिका पूरिता। | | | | |
| ५. | वाक्यानि लिखितानि। | | | | |
| ६. | धातुरूपाणि लिखितानि। | | | | |
| ७. | निर्देशानुसारं वाक्यानि लिखितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



# ८

# चाक्यार्कूत्त्



*साहित्यसङ्गीतकलाविहीनः।*

*साक्षात्पशुः पुच्छविषाणहीनः।।*

*साहित्यं, सङ्गीतं, कलाः इत्येतानि मानवजीवने अनुपेक्षणीयानि इति श्लोकस्यास्य आशयः। चतुःषष्टिः कलाः भारते सर्वत्र प्रसिद्धाः। ताः सुकुमारकलाः प्रयोजककलाः चेति द्विधा विभक्ताः। कथाकेलिः, तुल्लल्, चाक्यार्कूत्त्, कूटियाट्टमित्यादीनि केरलेषु प्रचुरप्रचारमाप्तानि सुकुमारकलारूपाणि भवन्ति। तेषु चाक्यार्कूत्त् इति कलारूपं परिचिनुमः।*

'चाक्यार्कूत्त्' इति कलारूपं पुरा केरलेषु आराधनालयेष्वेव प्रचलितमासीत्। अतः इयं कला 'क्षेत्रकला' इति प्रसिद्धा। अधुना विविधेषु सांस्कृतिकमण्डलेष्वपि इयम् अवतार्यते। 'कूत्त्' इति कैरलीपदं कूर्दनार्थक 'कुर्द्' धातोः निष्पन्नं भवति इति पण्डितमतम्। संस्कृतभाषया रचितानि चम्पूकाव्यान्येव अस्मिन् अवतार्यन्ते। अत्र वाचिकाभिनयस्य प्राधान्यम्। प्रथमं 'नम्ब्यार्' 'मिषाव्' वादयति। अनन्तरं विदूषकवेषधारी 'चाक्यार्' प्रविश्य मङ्गलमाचरति। ततः पीठिकां कथाञ्च अवतारयति। पुराणप्रसिद्धाः कथाः श्लोकानुसारं कैरलीभाषया एव विवृणोति।

'चाक्यार्' मनुजसाधारणानि दौर्बल्यानि, समकालिकजीवनसम्बन्धिविषयान् च उचिते सन्दर्भे सोपहासं विमृशति। उपस्थिताः प्रेक्षकाः अपि कथापात्रत्वेन परिकल्प्यन्ते। अवतारणवेलायां अङ्गुलीनिर्देशपूर्वकं राजानमपि उपहसितुं नटस्य स्वातन्त्र्यमस्ति। अस्मिन् कलारूपे 'मिषाव्' एव प्रधानवाद्योपकरणम्। 'कुषित्तालम्' अपि उपयुज्यते। रङ्गे दीपः पीठश्च विद्येते। हास्यप्रधानमिदं कलारूपं संस्कृतस्य कैरल्याः च मेलनेन रमणीयं भवति।

## पदच्छेदः

| | | |
|---|---|---|
| आसीदिति | - | आसीत् + इति |
| पद्यस्यास्य | - | पद्यस्य + अस्य |
| चम्पूकाव्यान्येव | - | चम्पूकाव्यानि + एव |
| पीठश्च | - | पीठः + च |
| प्रचाल्यमानं कलारूपं भवति | - | प्रचाल्यमानम् + कलारूपम् + भवति |
| कथाञ्च | - | कथाम् + च |

## विग्रहः

| | | |
|---|---|---|
| आराधनालयेषु | - | आराधनायाः आलयः आराधनालयः, तेषु। |
| सोपहासम् | - | उपहासेन सह वर्तत इति। |
| कलाविहीनः | - | कलया विहीनः। |
| पुच्छविषाणहीनः | - | पुच्छं च विषाणे च पुच्छविषाणानि, तैः हीनः। |
| अनुपेक्षणीयम् | - | उपेक्षितुं योग्यम् उपेक्षणीयम्। न उपेक्षणीयम्। |
| पण्डितमतम् | - | पण्डितानां मतम्। |

## पठनप्रवर्तनानि

- पाठभागं पठित्वा चाक्यार्कूत्त् इति कलारूपम् अधिकृत्य प्रश्नोत्तरकेलिं प्रचालयतु।

  श्रद्धेयौ अंशौ

  उचितप्रश्ननिर्माणम्।

  उचितोत्तररचयनम्।

- अधोदत्तानां पदानां समानार्थकपदानि पाठात् चित्वा लिखतु।

सुन्दरम्,परिहासः, मनुष्यः

श्रद्धेयौ अंशौ

उचितपदचयनम्।

अर्थावगमः।

- अधिकवाचनांशं पठित्वा चम्पूकाव्यस्य वैशिष्ट्यमधिकृत्य चर्चां करोतु। टिप्पणीं च लिखतु।

श्रद्धेयाः अंशाः -

भागभागित्वम्।

उचितभाषाप्रयोगः।

आशयावगमनम्।

- द्वित्राणां केरलीयकलारूपाणां चित्राणि सञ्चित्य टिप्पणीं लिखतु।

श्रद्धेयाः अंशाः -

उचितचित्राणां चयनम्।

टिप्पणीलेखनम्।

वाचनम्।

## अनुबन्धः

**अधिकवाचनांशः।**

काव्यं तु गद्यकाव्यं, पद्यकाव्यं, मिश्रकाव्यम् इति त्रिविधं भवति। तेषु मिश्रकाव्यं चम्पूरित्यभिधीयते।

चम्पू - 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते'।

मेल्पत्तूर् नारायणभट्टपादेन विरचिताः प्रबन्धाः प्रायेण चाक्यार् कूत्त् कलायाम् उपयुज्यन्ते।

अभिनयप्रकाराः - चत्वारः अभिनयप्रकाराः सन्ति।

आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा।

**शब्दकोशः**

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| उपजीव्य | आश्रित्य | ആശ്രയിച്ചിട്ട് | ಆಶ್ರಯಿಸಿ | being dependendent on |
| प्रचुरप्रचारम् | अत्यन्तं प्रचारं | വളരെ | ಬಹುಪ್ರಸಿದ್ಧನಾದ | very famous |
| आप्तानि | प्राप्तानि | പ്രചാരമുള്ളത് | | |
| निष्पन्नः | सञ्जातः | ഉണ്ടായത് | ಉಂಟಾದ | made |
| परिकल्प्यते | परिगण्यते | പരിഗണിക്കുന്നു | ಪರಿಗಣಿಸಲ್ಪಡುತ್ತದೆ | considers |
| पीठिका | पीठं | പീഠം | | stool |
| सोपहासं | सपरिहासं | പരിഹാസത്തോടുകൂടി | | |



**अमरकोशः**

राजा - राजाराट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः।

**धातुरूपाणि**

**परि + चिञ् (चयने) प.प. लट्**

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र. पु | परिचिनोति | परिचिनुतः | परिचिन्वन्ति |
| म. पु | परिचिनोषि | परिचिनुथः | परिचिनुथ |
| उ. पु | परिचिनोमि | परिचिनुवः/परिचिन्वः | परिचिनुमः/परिचिन्मः। |

**वि + मृश(आमर्शने) प.प.लट्**

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र. पु | विमृशति | विमृशतः | विमृशन्ति |
| म. पु | विमृशसि | विमृशथः | विमृशथ |
| उ. पु | विमृशामि | विमृशावः | विमृशामः। |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | प्रश्नोत्तरकेलिः प्रचालिता। | | | | |
| २. | समानार्थकपदानि चित्वा लिखितानि। | | | | |
| ३. | चर्चां कृत्वा टिप्पणी लिखिता। | | | | |
| ४. | चित्राणि सञ्चित्य टिप्पणी लिखिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*




# ९ स्वामी विवेकानन्दः।

*अनेकेषां महात्मनां त्यागधनानां संन्यासिश्रेष्ठानां च जन्मना पवित्रा इयं भारतभूमिः। तेषु प्रातःस्मरणीयो भवति स्वामी विवेकानन्दः। सर्वदुःखानां मूलकारणं भयमेव। 'भयं त्यजत, निर्भीको भव' इति विवेकानन्दवचनं प्रसिद्धम्।*



एकदा कश्चन बालः कोल्कत्तानगरे राजमार्गेण गच्छन्नासीत्। तदा सः अतिशीघ्रम् आगच्छत् अनियन्त्रकं किञ्चित् अश्वशकटम् अपश्यत्। काचित् महिला शकटे उपविश्य उच्चैः विलपन्ती आसीत्। जनाः संभ्रान्ताः स्तब्धाः स्थिताः। धीरः स बालः सपदि धावन्तमश्वं रशनां गृहीत्वा स्थगितवान्। एवं महिला च समाश्वासिता। अयं बाल एव पश्चात् स्वामी विवेकानन्दः इति प्रसिद्धोऽभवत्।

स्वामिनः विवेकानन्दस्य जन्म त्रिषष्ट्यधिकाष्टशतोत्तरसहस्रतमे (१८६३) वर्षे वङ्गदेशस्य कोल्कत्तानगरे अभवत्। अस्य पिता विश्वनाथदत्तः, माता भुवनेश्वरीदेवी चास्ताम्। बाल्यकाले वीरेश्वरः, नरेन्द्रः इत्यादिभिः नामान्तरैश्च सः ज्ञायते स्म।



श्रीरामकृष्णपरमहंसस्य शिष्येषु अग्रगण्यः आसीत् अयं महात्मा। स्वगुरोः आशयानां प्रचारणाय कालान्तरे सः श्रीरामकृष्णमठम् अस्थापयत्।

त्रिनवत्यधिकाष्टाशतोत्तरसहस्रतमे (१८९३) वर्षे अमेरिकादेशस्य चिक्कागोनगरे प्रवृत्ते सर्वधर्मसम्मेलने स्वभाषणेन सर्वानपि आनन्दयन् सः विश्वविख्यातः अभवत्। अस्य जीवने सिद्धान्तेषु च आकृष्टाः बहवः वैदेशिकाः अपि तस्य शिष्याः अभवन्। तेषु प्रमुखा आसीत् 'भगिनी निवेदिता' इति पश्चात् विख्याता 'मार्गरट् नोबिल्' महाभागा ।

"उत्तिष्ठत! जाग्रत! प्राप्य वरान्निबोधत!" इत्यादिभिः उपनिषद्वाक्यैः स्वामी विवेकानन्दः युवकान् प्राबोधयत्। भारतस्वातन्त्र्यान्दोलनस्य प्रेरक आसीदयं महात्मा। स्वीयं जीवितदौत्यं समाप्य द्वयधिकनवशतोत्तरसहस्रतमे (१९०२) वर्षे जूलै मासस्य चतुर्थे दिनाङ्के ब्रह्मभूयङ्गतः। भारतसर्वकारः अस्य जन्मदिनं देशीय युवजनदिनत्वेन समाचरति।

## पदच्छेदः।

| | | |
|---|---|---|
| भयं त्यजत | - | भयम् + त्यजत। |
| निर्भीको भव | - | निर्भीकः + भव। |
| प्रातःस्मरणीयो भवति | - | प्रातःस्मरणीयः + भवति। |
| स बालः | - | सः + बालः। |
| प्रेरकोऽयं | - | प्रेरकः + अयम्। |
| बाल एव | - | बालः + एव। |
| ब्रह्मभूयङ्गतः | - | ब्रह्मभूयम् + गतः । |
| गच्छन्नासीत् | - | गच्छन् + आसीत् । |
| नामान्तरैश्च | - | नामान्तरैः + च । |

## विग्रहः

| | | |
|---|---|---|
| महात्मनाम् | - | महान् आत्मा यस्य स; महात्मा, तेषाम्। |
| त्यागधनानाम् | - | त्यागः एव धनं येषां ते, त्यागधनाः, तेषाम्। |

विश्वविख्यातः - विश्वेषु विख्यातः।

वैदेशिकाः - विदेशे भवाः।

निर्भीकः - निर्गता भीः यस्मात्, सः।

स्वजीवितदौत्यम् - स्वकीयं जीवितं स्वजीवितं, दूतस्य कर्म भावो वा दौत्यं, स्वजीवितस्य दौत्यम्।

ब्रह्मभूयम् - ब्रह्मणा ऐक्यम्।

- ब्रह्मणो भावः ब्रह्मभूयम्।

## पठनप्रवर्तनानि।

- पाठभागं पठित्वा प्रश्नोत्तरकेलिं चालयतु।

  श्रद्धेयाः अंशाः

  उचितं प्रश्ननिर्माणम्।

  उचिता वाक्यघटना।

  आशयपूर्णता।

- नरेन्द्रस्य महिलायाः च मिथः भाषणं संभाव्य लिखतु।

  श्रद्धेयाः अंशाः

  सन्दर्भानुसारं सम्भाषणम्।

  उचिता वाक्यघटना।

  आशयक्रमीकरणम्।

- अधोदत्तानि वर्षाणि उदाहरणानुसारम् अक्षरैः लिखतु।

  उदा - १८९७ - सप्तनवत्यधिकाष्टशतोत्तरसहस्रम्।

  १८५६ १९४७ १९५६ २००२ २०१०



- पट्टिकायाः पदानि स्वीकृत्य उचितानि वाक्यानि रचयतु।

| | | | |
|---|---|---|---|
| बालः | नदीं | वीक्ष्य | स्नाति |
| शिशुः | रथं | गत्वा | उपविशति |
| महिला | मातरं | आरुह्य | तुष्यति |

श्रद्धेयौ अंशौ

अर्थावबोधः।

वाक्यघटना।

- पाठं पठित्वा लट्, लङ् लकारयुक्तानां पदानां पट्टिकां करोतु।

श्रद्धेयः अंशः

उचितं चयनम्।

- सूचनानुसारं प्रियमित्रमधिकृत्य खण्डिकां लिखतु।

सूचनाः - नाम, पितरौ, सङ्केतः, जन्मतिथिः, प्रियविनोदः इत्यादयः।

श्रद्धेयाः अंशाः

उचितभाषाप्रयोगः।

आशयपूर्णता।

आशयक्रमीकरणम्।

- समाजस्य प्रगत्यै स्वजीवनं समर्पितवन्तः महात्मानः बहवः सन्ति। चर्चां करोतु। तेषु एकस्य जीवनचरितं संक्षिप्य लिखतु।

सूचनाः - पित्रोः नाम, जन्मस्थानम्, जीवनकालः, विद्याभ्यासः, योगदानम्, वृत्तिः आदयः।

श्रद्धेयाः अंशाः

भागभागित्वम्।

उचितभाषाप्रयोगः।

आशयक्रमीकरणम्। युक्तिपूर्वम् अवतारणम्।

- स्वामिनः विवेकानन्दस्य उद्बोधनानि समाहरतु। अवतारयतु।

श्रद्धेयौ अंशौ

आशयक्रमीकरणम्।

उचितभाषाप्रयोगः।

## अनुबन्धः

### शब्दकोशः।

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| निर्भीकः | निर्भयः | ഭയമില്ലാത്തവൻ | ಭಯವಿಲ್ಲದವನು | fearless |
| अस्थापयत् | स्थापयति स्म | സ്ഥാപിച്ചു | ಸ್ಥಾಪಿಸಿದನು | founded |
| शकटम् | यानम् | വണ്ടി | ಗಾಡಿ | vehicle |
| प्रसिद्धः | प्रथितः | പ്രസിദ്ധൻ | ಪ್ರಸಿದ್ಧ | famous |
| निबोधत | जानीत | നിങ്ങൾ അറിയുവിൻ | ತಿಳಿಯಿರಿ | you must know |
| अग्रगण्यः | प्रथमगणनीयः | അഗ്രഗണ്യൻ | ಮೊದಲಿಗನು | foremost |
| दौत्यम् | दूतकर्म | ദൗത്യം | ದೂತನ ಕೆಲಸ | message |

### अमरकोशः।

अश्वः - घोटके पीतितुरगतुरङ्गाश्वतुरंगमाः।

वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः।।

पिता - तातस्तु जनकः पिता।

माता - जननयित्री प्रसूर्माता जननी।



❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | प्रश्नोत्तरकेलिः चालिता। | | | | |
| २. | सम्भाषणं रचितम् | | | | |
| ३. | संख्या अक्षरैः लिखिता। | | | | |
| ४. | वाक्यानि रचितानि। | | | | |
| ५. | क्रियापदानि चित्वा पट्टिकारूपेण लिखितानि। | | | | |
| ६. | मित्रमधिकृत्य लेखो लिखितः। | | | | |
| ७. | जीवनचरितं लिखितम्। | | | | |
| ८. | विवेकानन्दस्य उद्बोधनानि अवतारितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

१०

# गोकुलविहारः ।

सुकुमारकविना विरचितं भवति श्रीकृष्णविलासाख्यं महाकाव्यम्। सुमेरुवर्णनया काव्यमिदमारभ्यते। असुराणां पीडनेन नितरां दुःखिता भूमीदेवी ब्रह्मणः निर्देशमनुसृत्य देवगणैः साकं वैकुण्ठं प्राप्य भगवन्तं विष्णुं प्रार्थयामास। संप्रीतः विष्णुः ''असुरनिग्रहार्थं वसुदेवपत्न्यां देवक्यां श्रीकृष्णरूपेण अवतरिष्यामि'' इति अवदत्। एवं वसुधाम् अवतीर्णस्य शिशोः कृष्णस्य बाललीलाः काव्ये तृतीयसर्गे विस्तरेण वर्ण्यन्ते। आदौ श्रीकृष्णस्य गोकुलवासं, ततःपरं शकटभञ्जनं च कविः अत्र वर्णयति।)

१. **मुग्धभावमधुरेण रञ्जयन्**
**शैशवेन हृदयं व्रजौकसाम्।**
**गोकुले स विजहार केशवः**
**क्षीरवारिनिधिमप्यचिन्तयन्।।**

**पदच्छेदः**

अप्यचिन्तयन् - अपि + अचिन्तयन्।

स विजहार - सः + विजहार।

**विग्रहः**

शैशवेन - शिशोः भावः शैशवं, तेन

व्रजौकसाम् - व्रजम् ओकः येषां ते व्रजौकसः, तेषाम्।

मुग्धभावमधुरेण - मुग्धश्चासौ भावश्च मुग्धभावः, तेन मधुरः, मुग्धभावमधुरः, तेन।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सः केशवः | - | सः कृष्णः |
| मुग्धभावमधुरेण | - | मोहनेन मधुरस्वभावेन |
| शैशवेन | - | बालभावेन |

| | | |
|---|---|---|
| व्रजौकसां | - | गोकुलवासिनां |
| हृदयं | - | मानसं |
| रञ्जयन् | - | सन्तोषयन् |
| क्षीरवारिनिधिमपि | - | क्षीरसागरमपि |
| अचिन्तयन् | - | न चिन्तयन् |
| गोकुले विजहार | - | व्रजे विहरति स्म। |

**आशयः**

कृष्णः बालभावमाधुर्येण गोकुलवासिनां मनांसि सन्तोषयन् अवर्तत। सः स्वस्य आवासस्थानं क्षीरसागरमपि विस्मृत्य गोकुले विहरति स्म।

**२. अधः कदाचिच्छकटस्य शायितः**
**स्वकार्यपर्याकुलया यशोदया।**
**स लीलया पादसरोरुहं शनै-**
**रुदञ्चयामास सरोजलोचनः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| स लीलया | - | सः + लीलया। |
| कदाचिच्छकटस्य | - | कदाचित् + शकटस्य। |
| शनैरुदञ्चयामास | - | शनैः + उदञ्चयामास। |

**विग्रहः**

| | | |
|---|---|---|
| सरोजलोचनः | - | सरसि जातं सरोजं, सरोजम् इव लोचने यस्य सः। |
| स्वकार्यपर्याकुलया | - | स्वस्य कार्यं स्वकार्यं, तेन पर्याकुला स्वकार्यपर्याकुला, तया। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| कदाचित् | - | एकदा |
| स्वकार्यपर्याकुलया | - | गृहकार्यनिमग्नया |
| यशोदया | - | मात्रा यशोदया |

| | | |
|---|---|---|
| शकटस्य | - | यानस्य |
| अधः शायितः | - | अधः शयनं कारितः (माता पुत्रं शकटस्य अधः शायितवती) |
| सः सरोजलोचनः | - | सः कमलनयनः (श्रीकृष्णः) |
| लीलया | - | हेलया(क्रीडया) |
| शनैः | - | मन्दं मन्दम् |
| पादसरोरुहं | - | पादकमलं |
| उदञ्चयामास | - | उत्थापयामास। |



**आशयः**

एकदा गृहकर्मसु व्यापृता यशोदा रथस्य अधः कृष्णं शायितवती। तदानीं सः कृष्णः लीलया कमलसदृशं पादम् उद्धृतवान्।

**३. मधुजितश्चरणाम्बुजताडितं**
**शकटमाशु समुत्थितमम्बरे।**
**विपरिवृत्य पपात महीतले**
**पटुतरध्वनिपूरितदिङ्मुखम्।।**

**पदच्छेदः**

मधुजितश्चरणाम्बुजताडितम् - मधुजितः + चरणाम्बुजताडितम्।

**विग्रहः**

मधुजितः - मधुं जयतीति मधुजित्, तस्य।

महीतले - मह्याः तलं महीतलं, तस्मिन्।

पटुतरध्वनिपूरितदिङ्मुखम् - दिशां मुखं दिङ्मुखम्, अतिशयेन पटुः पटुतरः, पटुतरश्चासौ ध्वनिश्च पटुतरध्वनिः, तेन पूरितं दिङ्मुखं यस्मिन् कर्मणि तद् यथा तथा।

| **अन्वयः** | **अर्थः** |
|---|---|
| मधुजितः | - मधुनामकम् असुरं जितवतः |
| चरणाम्बुजताडितं | - पादकमलेन प्रहृतं |
| शकटम् | - यानम् |
| आशु | - क्षिप्रं |
| अम्बरे | - आकाशे |
| समुत्थितं | - ऊर्ध्वं गतं (सत्) |
| विपरिवृत्य | - अधोमुखीभूय |

महीतले - भूमौ

पटुतरध्वनिपूरितदिङ्मुखं - घोरशब्देन सर्वाः दिशः पूरयत्

पपात - अपतत्।

**आशयः**

कृष्णस्य पादाघातेन ऊर्ध्वं गतं शकटं क्षणेन गगने बहुवारं परिवृत्य अधोमुखीभूय दिशामुखे घोरशब्दम् उत्पादयत् अपतत्।

**४. शकटं मधुसूदनस्य दृष्ट्वा**
**चरणोदञ्चनविभ्रमेण भग्नम्।**
**अथ वारिनिधेर्विवेश गर्भं**
**स्वरथस्यापि विशङ्क्य भङ्गमर्कः।।**

**पदच्छेदः**

वारिनिधेर्विवेश - वारिनिधेः + विवेश।

स्वरथस्यापि - स्वरथस्य + अपि।

**विग्रहः**

मधुसूदनः - मधुं सूदयति इति।

चरणोदञ्चनविभ्रमेण-चरणयोः उदञ्चनं चरणोदञ्चनं, तेन विभ्रमः चरणोदञ्चनविभ्रमः, तेन।

वारिनिधेः - वारीणां निधिः वारिनिधिः, तस्य।

स्वरथस्य - स्वस्य रथः स्वरथः, तस्य।

**अन्वयः** **अर्थः**

अथ - अनन्तरं

अर्कः - सूर्यः

मधुसूदनस्य - कृष्णस्य

चरणोदञ्चनविभ्रमेण- चरणोत्थानलीलया।

भग्नम् - विशीर्णम्

शकटम् - यानम्

| | | |
|---|---|---|
| दृष्ट्वा | - | वीक्ष्य |
| स्वरथस्य अपि | - | स्वस्य रथस्य अपि |
| भङ्गम् | - | भेदनम् |
| विशङ्क्य | - | संशय्य |
| वारिनिधेः | - | समुद्रस्य |
| गर्भम् | - | अन्तर्भागम् |
| विवेश | - | प्रविशति स्म। |

**आशयः**

श्रीकृष्णस्य चरणोद्गमनेन विशीर्णं शकटं दृष्ट्वा एवं स्वरथस्यापि भङ्गः स्यादिति चिन्तया सूर्यः झटिति समुद्रस्य अन्तर्भागं प्रविशति स्म। (सायङ्कालः सम्प्राप्तः इत्याशयः।)

५. **अथ प्रयाति प्रहरे यशोदा**
**जने च किञ्चिन्निभृते सनिद्रे।**
**पुत्रं पयःपानगुरुप्रमोदं**
**प्रस्वापयन्ती कलमित्यगायत्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| किञ्चिन्निभृते | - | किञ्चित् + निभृते। |
| कलमित्यगायत् | - | कलम् + इति + अगायत्। |

**विग्रहः**

| | |
|---|---|
| सनिद्रे | - निद्रया सह वर्तत इति सनिद्रः, तस्मिन्। |
| पयःपानगुरुप्रमोदम् | - पयसां पानं पयःपानं, तेन गुरुः पयःपानगुरुः, पयःपानगुरुः प्रमोदः यस्य सः, पयःपानगुरुप्रमोदः, तम्। |

| अन्वयः | | अर्थः |
|---|---|---|
| अथ | - | अनन्तरम् |
| प्रहरे प्रयाति(सति) | - | यामे गच्छति(सति) |
| जने सनिद्रे | - | जने निद्रया सहिते जाते(सति) |
| किञ्चित् निभृते | - | ईषद् निश्शब्दे जाते |
| यशोदा | - | माता यशोदा |
| पयःपानगुरुप्रमोदम् | - | क्षीरपानेन नितान्तं सन्तुष्टम् |
| पुत्रम् | - | तनयम् |
| प्रस्वापयन्ती | - | निद्रापयन्ती |
| कलम् | - | मधुरम् |
| इति | - | एवं प्रकारेण |
| अगायत् | - | गायति स्म। |

**आशयः**

सूर्यास्तमयानन्तरं रात्रेः एकः यामः अतीतः। सर्वे जनाः निद्राम् उपगताः। निःशब्दता सर्वत्र प्रसृता। तदा यशोदा क्षीरपानेन सन्तुष्टं पुत्रं निद्रापयन्ती मधुरम् अगायत्।

## पठनप्रवर्तनानि।

- सतालं श्लोकान् आलपतु।

  श्रद्धेयाः अंशाः

  अक्षरस्फुटता।

  उचितस्थाने यतिः।

  आशयव्यक्तता।

- श्लोकानाम् अन्वयं लिखतु।

श्रद्धेयाः अंशाः

श्लोकान्तर्गतपदानां स्वीकारः।

अन्वयक्रमः।

आशयज्ञानम्।

- श्रीकृष्णस्य गोकुलवासं वर्णयतु।

श्रद्धेयाः अंशाः

उचितपदावली।

श्लोकानाम् आशयः।

क्रमीकरणम्।

- शकटभङ्गं विशदयतु।

श्रद्धेयाः अंशाः

उचितपदावली।

श्लोकानाम् आशयः।

क्रमीकरणम्।

- श्लोकान् सम्यक् पठतु, पदप्रश्नं पूरयतु।

श्रद्धेयाः अंशाः

उचितपदलेखनम्।

श्लोकानां सम्यक् वाचनम्।

पदावलीपरिचयः।

| | | | | |
|---|---|---|---|---|
| १ के | २ - | वः | ३ | ४ - |
| ५ | क | ६ | निः | भः |
| यः | - | -७ | कु | - |

दक्षिणतः

१. श्रीकृष्णस्य अपरं नाम।

६. ऋषिः इत्यर्थकं पदम्।

७. श्रीकृष्णस्य वासस्थानम्।

अधः

२. अम्बरे आशु समुत्थितं किम्?

३. शब्दः इत्यर्थकं पदम्।

४. आकाशशब्दस्य समानार्थकं पदम्।

५. क्षीरमित्यर्थकं पदम्।

- अनुबन्धस्थं पत्लृ धातोः रूपं पठित्वा पट्टिकां पूरयतु।

श्रद्धेयौ अंशौ

उचितपदविन्यासः

क्रमीकरणम्।

पठ व्यक्तायां वाचि, प. प. लिट्

| | ए.व | द्वि.व | ब. व |
|---|---|---|---|
| प्र. पु | पपाठ | —— | —— |
| म. पु | —— | —— | —— |
| उ. पु | —— | —— | —— |



## अनुबन्धः।

**अमरकोशः**

| | | |
|---|---|---|
| वृक्षः | - | वृक्षो महीरुहः शाखी विटपी पादपस्तरुः। |
| अर्कः | - | सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः। |
| पुत्रः | - | आत्मजस्तनयः सूनुः सुतः पुत्रः। |

## धातुरूपाणि

### वि + हृञ् हरणे - प.प. लिट्

| | ए.व | द्वि.व | ब. व |
|---|---|---|---|
| प्र. पु. | विजहार | विजह्रतुः | विजह्रुः |
| म. पु. | विजहर्थ | विजह्रथुः | विजह्र |
| उ. पु. | विजहार/विजहर | विजह्रिव | विजह्रिम। |

### उद् + अञ्चु(गतौ पूजायां च) णिच् - प.प. लिट्

| | ए.व | द्वि.व | ब. व |
|---|---|---|---|
| प्र. पु. | उदञ्चयामास | उदञ्चयामासतुः | उदञ्चयामासुः |
| म. पु. | उदञ्चयामासिथ | उदञ्चयामासथुः | उदञ्चयामास |
| उ. पु. | उदञ्चयामास | उदञ्चयामासिव | उदञ्चयामासिम। |

### पत्लृ (गतौ) - प.प. लिट्

| | ए.व | द्वि.व | ब. व |
|---|---|---|---|
| प्र. पु | पपात | पेततुः | पेतुः |
| म. पु | पेतिथ | पेतथुः | पेत |
| उ. पु | पपात/पपत | पेतिव | पेतिम। |



## विश् - प.प. लिट्

| | ए.व | द्वि.व | ब. व |
|---|---|---|---|
| प्र. पु | विवेश | विविशतुः | विविशुः |
| म. पु | विवेशिथ | विविशथुः | विविश |
| उ. पु | विवेश | विविशिव | विविशिम। |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | श्लोकाः आलपिताः। | | | | |
| २. | अन्वयानि लिखितानि। | | | | |
| ३. | गोकुलवासो वर्णितः। | | | | |
| ४. | शकटभङ्गः स्ववाक्यैः लिखितः। | | | | |
| ५. | पदप्रश्नः पूरितः। | | | | |
| ६. | पट्टिका पूरिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

११

# सहसा विदधीत न क्रियाम्

*पुराणानि अष्टादश वर्तन्ते। तानि वेदव्यासेन विरचितानि इति कथ्यते। तेषु भक्तिभावनिर्भरं भवति श्रीमद्भागवतमहापुराणम्। ग्रन्थेऽस्मिन् अष्टादशसहस्रं श्लोकाः विद्यन्ते। तस्मात् ग्रन्थात् स्वीकृतां काञ्चित् कथां पठामः।*

कदाचित् 'परीक्षित्' नामको राजर्षिः मृगयार्थं किमपि घोरं वनं प्राविशत्। मृगयायां प्रवृत्तः श्रान्तः सः जलमन्विष्य शमीकमुनेः पर्णशालां प्राप्तवान्। "महात्मन्! पिपासया पीडितोऽहम्। देहि मे स्वल्पं जलम्" इति सः विनयेन मुनिम् अयाचत। ध्याननिमग्नः सः मुनिः महाराजस्य वाक्यानि न अशृणोत्।



मुनेः इदमाचरणम् आत्मनः अवहेलनं मन्वानः राजा कोपान्धोऽभवत्। तस्य विवेको नष्टः। सः आश्रमपरिसरात् कञ्चित् मृतं सर्पं स्वधनुष्कोट्या आदाय मुनेः कण्ठे निक्षिपति स्म। ततः स्वपुरमगच्छत्।



विषयमिमं ज्ञात्वा तत्रागतः मुनिकुमारः दुःखितः अभवत्। 'प्रजापालकेनैव पापोऽयमनुष्ठितः, अतः अयं दण्डमर्हति' इत्यमन्यत। 'तक्षकदंशनेन सप्तमे दिने मृतो भविष्यति' इति सः राजानं शशाप।

ध्यानादुत्थितः शमीकमुनिः शापवृत्तान्तं ज्ञात्वा दुःखितोऽभवत्। सः स्वपुत्रम् एवम् अवदच्च - "वत्स! विष्णुभक्तः राजर्षिः शापं नार्हति। त्वया पापः आचरितः। तापसानामस्माकं मानापमानचिन्ता नोचिता" इति।

महाराजोऽपि स्वेन कृतेन कुकर्मणा दुःखितः आसीत्। मुनिकुमारस्य शापवचनानि श्रुत्वा स भृशम् अदूयत। एवं सन्तप्तहृदयः महाराजः यदृच्छया तत्रागतस्य श्रीशुकस्य मुखात् भागवतकथामृतं पिबन् सप्त दिनानि यापयामास।

## पदच्छेदः।

| | | |
|---|---|---|
| ग्रन्थेऽस्मिन् | - | ग्रन्थे + अस्मिन्। |
| पीडितोऽहम् | - | पीडितः + अहम्। |
| तत्रागतः | - | तत्र + आगतः। |
| प्रजापालकेनैव | - | प्रजापालकेन + एव। |
| पापोऽयमनुष्ठितः | - | पापः + अयम् + अनुष्ठितः। |
| अवदच्च | - | अवदत् + च। |
| नार्हति | - | न + अर्हति। |
| नोचिता | - | न + उचिता। |

## विग्रहः।

| | | |
|---|---|---|
| राजर्षिः | - | राजा च असौ ऋषिः च। |
| कोपान्धः | - | कोपेन अन्धः। |
| ध्याननिमग्नः | - | ध्याने निमग्नः। |
| कुकर्मणा | - | कुत्सितं कर्म कुकर्म, तेन। |

## पठनप्रवर्तनानि।

- पाठभागात् संश्लिष्टपदानि चित्वा उदाहरणानुसारं पदच्छेदं करोतु।

| | | |
|---|---|---|
| पीडितोऽहम् | - | पीडितः + अहम्। |
| - - - - - | - | - - - - - - |
| - - - - - | - | - - - - - - |
| - - - - - | - | - - - - - - |
| - - - - - | - | - - - - - - |

श्रद्धेयौ अंशौ

उचितपदचयनम्।

उचितः पदच्छेदः।

■ पाठभागात् अव्ययानि चित्वा लिखतु।

श्रद्धेयः अंशः

उचितं पदचयनम्।

■ अधोदत्तेषु वाक्येषु क्रियापदानि लङ् लकाररूपेण परिवर्तयतु।

छात्रः कक्ष्यां प्रविशति। ________

बालकाः गृहं गच्छन्ति। ________

वृक्षात् फलानि पतन्ति। ________

द्वौ मार्जारौ स्तः। ________

श्रद्धेयौ अंशौ

लकारबोधः।

वाक्यलेखनम्।

■ चित्रं दृष्ट्वा महाराजस्य श्रीशुकस्य च भाषणं सम्भाव्य लिखतु।

श्रद्धेयाः अंशाः

सन्दर्भानुसारं सम्भाषणम्।

उचिता वाक्यघटना।

पदावलीपरिचयः।



- पुराणानां महत्त्वमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।

श्रद्धेयाः अंशाः

उचितभाषाप्रयोगः।

भागभागित्वम्।

सयुक्तिकसमर्थनम्।

## अनुबन्धः।

**शब्दकोशः**

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| कदाचित् | एकदा | ഒരിക്കൽ | ಒಂದಾನೊಂದು ಕಾಲದಲ್ಲಿ | once upon a time |
| राजर्षिः | राजश्रेष्ठः | രാജർഷി | ರಾಜಶ್ರೇಷ್ಠನು | king |
| मृगयार्थम् | आखेटार्थम् | നായാട്ടിനായി | ಬೇಟೆಗಾಗಿ | for hunting |
| घोरम् | भयानकम् | ഭയാനകമായ | ಭಯಾನಕವಾದ | terrible |
| श्रान्तः | क्षीणः | ക്ഷീണനായ | ಬಳಲಿದ | tired |
| पर्णशालां | उटजम् | ആശ്രമം | ಆಶ್ರಮವನ್ನು | hermitage |
| पिपासा | तृषा | ദാഹം | ಬಾಯಾರಿಕೆ | thirst |
| पीडितः | दुःखितः | ദു:ഖിതൻ | ದು:ಖಿತನು | one who is sad |
| देहि | यच्छ | തരൂ | ಕೊಡು | give |
| अशृणोत् | आकर्णयत् | കേട്ടു | ಕೇಳಿಸಿಕೊಂಡನು | heard |
| अवहेलनम् | अवमाननम् | അപമാനിക്കൽ | ಅವಮಾನ | dishonour |
| धनुष्कोट्या | धनुषः अग्रेण | വില്ലിന്റെഅഗ്രത്താൽ | ಬಿಲ್ಲಿನ ತುದಿಯಿಂದ | by the notched end of a bow |
| दण्डः | दण्डनम् | ശിക്ഷ | ಶಿಕ್ಷೆ | punishment |
| तक्षकदंशनम् | तक्षकदशनम् | തക്ഷകന്റെകടി | ತಕ್ಷಕನೆಂಬ ಹಾವಿನ ಕಚ್ಚುವಿಕೆ | bite of snake Takshaka |
| कुकर्मणा | कुत्सितकर्मणा | ദുഷ്പ്രവൃത്തിയാൽ | ಕೆಟ್ಟ ಕೆಲಸದಿಂದ | bywickedness |
| भृशम् | अत्यन्तम् | വളരെയധികം | ಅತ್ಯಂತ | very much |

| | | | | |
|---|---|---|---|---|
| यापयामास | अनयत् | കഴിച്ചുകൂട്ടി | ಕಾಲ ಕಳೆದನು | passed the time |
| अदूयत | दुःखितः अभवत् | ദുഃഖിച്ചു | ದು:ಖಿತನಾದನು | became sad |
| अमन्यत | अचिन्तयत् | ചിന്തിച്ചു | ತಿಳಿದನು | considered |
| मन्यमानः | चिन्तयन् | ചിന്തിച്ചിട്ട് | ತಿಳಿಯುವವನು | believing |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु ।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| १ | संश्लिष्टानि पदानि चित्वा पदच्छेदः कृतः। | | | | |
| २. | अव्ययपदानि चित्वा लिखितानि। | | | | |
| ३. | लकारः परिवर्तितः। | | | | |
| ४. | सम्भाषणं लिखितम्। | | | | |
| ५. | चर्चित्वा टिप्पणी लिखिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*